# 2.6.4 QLM Supporting Documents

1\.

## जनवरी-मार्च २०१९

### छात्राणां वाक्कौशलवर्धनाय प्रवृत्ता वाग्वर्धिनीपरिषत्

प्रतिवर्षमिव अस्मिन्नपि वर्षे छात्राणां वाक्कौशलवर्धनाय विश्वविद्यालये वाग्वर्धिनीपरिषदः सत्राणि प्रतिगुरुवासरमायोजितानि। प्रत्येकं सत्राय कश्चित् शास्त्रीयः विषयः पूर्वमेव निश्चीयते स्म। सर्वेऽपि छात्रवक्तारः तस्यैव विषयस्य विविधानि मुखानि मण्डयन्ति स्म। विषयानुगुणं तत्तच्छास्त्रे निपुणाः प्राध्यापकाः एकैकस्य सत्रस्य आध्यक्ष्यमवहन्। वाग्वर्धिनीपरिषदः २०१८-१९तमस्य शैक्षिकवर्षस्य अन्तिमं सत्रं मार्चमासस्य पञ्चविंशे दिने सम्पन्नम्। प्रो. देवेन्द्रनाथ पाण्डेयः सत्रस्यास्य आध्यक्ष्यमवहत्। सत्रेऽस्मिन् आवर्षम् उत्कृष्टभाषणानि कृतवद्भ्यः दशभ्यः छात्रेभ्यः प्रशस्तिपत्राणि वितीर्णानि। शास्त्रितृतीयवर्षे अधीयानः छात्रः केशवकुमारपाण्डेयः परिषदा सर्वोत्कृष्टच्छात्रप्रशस्तिं प्राप्नोत्। अस्मिन् वर्षे डॉ. बी. उमामहेश्वरी परिषदः अध्यक्षा, डॉ. दीपेश कतिरा, डॉ. शत्रुघ्न पाणिग्राही च संयोजकौ आस्ताम्।

## वाग्वर्धिनीपरिषत् - २०१९-२०



वाग्वर्धिनीसभायाः अधिवेशनस्य एकं दृश्यम्

वाग्वर्धिनीपरिषदियं प्रतिवर्षमिव अस्मिन् वर्षेऽपि २०१९-२०२० मान्यकुलपतिवर्याणां शुभाशीर्वचोभिः अनुस्नातकविभागाध्यक्षप्राचार्ययोः मार्गदर्शने १०.०७.२०१९ दिनाङ्के गुरुवासरे समारब्धा। सभेयं प्रतिगुरुवासरं सायं ४.३० तः ६.०० वादनं यावत् विभिन्नविषयान् आश्रित्य प्रचलति। प्रत्येकस्मात् कक्ष्यातः छात्रद्वयस्य भागग्रहणाय अवकाशः भवति, योगविभागच्छात्राः तथा च तत्त्वाचार्यच्छात्राः अपि अत्र सोत्साहं भागग्रहणं कृत्वा विषयानुगुणं विद्वत्तापूर्णभाषणैः स्ववाक्कौशलं प्रदर्शयन्ति। अस्याः सभायाः सञ्चालनादिकं सर्वमपि कार्यं स्वयं छात्राः निर्वहन्ति। प्रथमेऽस्मिन्सत्रे उद्घाटनसभया सह ५ सत्राणि अभवन्। प्रतिवर्षमिव अस्मिन् वर्षेऽपि अस्माभिः कक्ष्याप्रतिनिधीनां चयनं कृतमस्ति। प्रत्येककक्ष्यायां प्रतिनिधिद्वयी कल्पिताऽस्ति। तद्यथा - शास्त्री -१, सालासिया श्रुतिः, पण्ड्या वत्सलश्च। शास्त्री -२, दवे नीलः सत्यव्रत पाण्डेयश्च। शास्त्री -३, व्यास मिरल, सत्यमकुमार पाठकश्च। आचार्यः -१, कृष्णकुमार पाण्डेयः, रवि रादडिया च। आचार्यः - २, धर्मेन्द्र जोषी। तत्त्वाचार्यः - शियाणी जयेशः। योगः - दिव्या मारिया च। वाग्वर्धिनीपरिषदः अध्वदर्शी - रावल मयूरः, आचार्य - २। अस्याः परिषदः अध्यक्षा डा० उमामहेश्वरी, संयोजकौ - डा० शत्रुघ्न पाणिग्राही, डा० दिपेश विनोद कतिरा च।

2.

# राज्यस्तरीयशास्त्रीयस्पर्धायां विश्वविद्यालयच्छात्राणां प्रदर्शनम्

राष्ट्रियसंस्कृतसंस्थानेन प्रतिवर्षम् आयोज्यमानायाः अखिलभारतीय-शास्त्रीयस्पर्धायाः अङ्गतया गुजरातराज्ये २६ तः २८ नवम्बर २०१९ दिनाङ्केषु श्रीगुजरातप्रदेशसंस्कृतपाठशालामण्डलेन छारोडीस्थे "दर्शनम्" संस्कृत-महाविद्यालये राज्यस्तरीयशास्त्रीयस्पर्धायाः आयोजनं कृतम्। तत्र श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य चतुर्दशच्छात्राः विभिन्नेषु शास्त्रीय-विषयेषु भागम् अग्रहीषत। तेषु छात्राः पुरस्कारभाजाः अभूवन्।

| | | |
|---|---|---|
| १. कृष्णकुमारपाण्डेयः (आचार्यः १) | वेदभाष्यभाषणम् | स्वर्णपदकम् |
| २. रावलः मयूरः (आचार्यः २) | ज्योतिषभाषणम् | स्वर्णपदकम् |
| ३. देरासरी ऋषभः (आचार्यः २) | साहित्यभाषणम् | स्वर्णपदकम् |
| ४. देरासरी ऋषभः (आचार्यः २) | समस्यापूर्तिः | कांस्यपदकम् |
| ५. जोषी ध्रुविनः (आचार्यः १) | सांख्ययोगभाषणम् | रजतपदकम् |
| ६. रादड़िया रविः (आचार्यः १) | व्याकरणभाषणम् | कांस्यपदकम् |
| ७. पण्ड्या रिधमः (आचार्यः १) | न्यायशलाका | कांस्यपदकम् |
| ८. प्रणवः कश्यपः (आचार्यः १) | वेदान्तभाषणम् | कांस्यपदकम् |
| ९. राजकुमार झा (आचार्यः १) | जैनबौद्धभाषणम् | कांस्यपदकम् |

श्रीसोमनाथसंस्कृतविश्वविद्यालयपक्षतः एतस्य छात्रग्रामस्य नेतृत्वं ज्योतिषप्राध्यापकेन श्रीनित्यानन्दओझावर्येण अकारि।



3./ 4.

## श्रीसोमनाथसंस्कृतविश्वविद्यालये समायोजितः संस्कृतसप्ताहोत्सवः

प्रतिवर्षमिव अस्मिन् वर्षेऽपि २६.८.२०१५ तः १.९.२०१५ पर्यन्तं श्रीसोमनाथसंस्कृतविश्वविद्यालये संस्कृतसप्ताहोत्सवः सोत्साहम् आचरितः। उत्सवस्यास्य अङ्गतया विश्वविद्यालये नैकासां स्पर्धानाम् आयोजनं कृतमासीत्। आसु स्पर्धासु वेरावलतालुकाक्षेत्रे विद्यमानेषु माध्यमिक-उच्चमाध्यमिक-विद्यालयेषु महाविद्यालयेषु च पठन्तः २५५ छात्राः भागम् अवहन्। उत्सवस्यास्य उद्घाटने एल्. एन्. मिथिला विश्वविद्यालयस्य संस्कृतविभागाध्यक्षचराः प्राच्यपाश्चात्यविद्यानिपुणाः महान्तो वैयाकरणा दार्शनिकाश्च प्रोफेसर हृषीकेश-झा-महाभागाः समुपस्थाय छात्रान् प्रेरितवन्तः। तैः समं रमौली, नवादा इत्यत्र विद्यमानस्य राष्ट्रियसंस्कृतसंस्थानस्य आदर्शसंस्कृतमहाविद्यालयस्य प्राचार्याः डॉ कामेश्वर चौधरी महाभागाः अपि उद्घाटनकार्यक्रमे अतिथित्वेन संप्राप्ताः। तैः अपि स्वीये उद्बोधने संस्कृतभाषायाः, संस्कृताध्ययनस्य च महत्त्वं ज्ञापितम्। सप्ताहेऽस्मिन् प्रवृत्तानां स्पर्धानां सङ्क्षिप्तं वृत्तम् इत्थम् -

| क्रमः | स्पर्धा | भागग्राहिणः | | | | आहृत्य |
|---|---|---|---|---|---|---|
| | | माध्यमिक विद्यालयेभ्यः | उच्चमाध्यमिक विद्यालयेभ्यः | महाविद्यालयेभ्यः | विश्वविद्यालयीयाः | |
| १ | वक्तृत्वस्पर्धा | ७ | १ | ० | १५ | २३ |
| २ | कथाकथनस्पर्धा | ५ | १ | ० | ७ | १३ |
| ३ | रङ्गवल्लीस्पर्धा | ११ | ९ | ६ | ९ | ३५ |
| ४ | निबन्धलेखनस्पर्धा | ८ | २ | ० | १२ | २२ |
| ५ | श्लोकगानस्पर्धा | ११ | ६ | १ | २४ | ४२ |
| ६ | समूहगानस्पर्धा | ४८ | १९ | ० | २४ | ९१ |
| ७ | विज्ञापनस्पर्धा | ० | ० | ० | १५ | १५ |
| ८ | रसप्रश्नाः | ० | ० | ० | १४ | १४ |
| | आहृत्य | ९० | ३८ | ७ | १२० | २५५ |

उत्सवस्यास्य समारोपकार्यक्रमः १.९.२०१५ दिनाङ्के सम्पन्नः। कार्यक्रमेऽस्मिन् वेरावलनगरस्य वरिष्ठः अधिवक्ता श्रीमान् किशोर कोटक विशिष्टातिथित्वेन समुपस्थाय संस्कृतभाषायाः, विविध-स्पर्धासु भागग्रहणस्य च महत्त्वम् अबोधयत्। श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतयः प्रोफेसर अर्कनाथ चौधरी महाभागाः अपि कार्यक्रमे समुपस्थाय संस्कृतानुरागिणः समबोधयन्। संस्कृतभाषायाः व्यापकाय प्रचाराय ईदृश-स्पर्धानां महत्त्वं व्यज्ञापयन्। तेन सममेव संस्कृतप्रचारकार्ये प्रौद्योगिकी-उपयोगस्य सम्भावनाः अपि अचर्चयन्। आगामिषु वर्षेषु इतोऽपि महता वैभवेन संस्कृतसप्ताहोत्सवः आचरितः भवेत् इति तदीयं संकल्पमपि ते प्राकटयन्।



## संस्कृतसप्ताहोत्सवः शास्त्रीयव्याख्यानमाला च







संस्कृतसप्ताहोत्सवस्य उद्घाटनकार्यक्रमः

श्री सोमनाथसंस्कृतविश्वविद्यालयः १३/०८/२०१६ दिनाङ्कतः १९/०८/२०१६ दिनाङ्कं यावत् संस्कृतसप्ताहोत्सवेन साकं शास्त्रीयव्याख्यानमालाकार्यक्रमं समायोजितवान् । विश्वविद्यालयपरिसरे समायोजितेऽस्मिन् कार्यक्रमे विशिष्टानि शास्त्रीयव्याख्यानानि विविधाः स्पर्धाश्चायोजिताः।

- १३/०८/२०१६ तमे दिनाङ्के सरस्वतीवन्दनया सह दीपप्रज्वालनपूर्वकं कार्यक्रमस्योद्घाटनसमारोहः मान्यानां महानुभावानां प्रो.पङ्कजचांदेमहोदयानां, प्रो. अभिराजराजेन्द्रमिश्रमहोदयानां, डो. गौतमपटेलमहोदयानां च समुपस्थितौ, प्रो. अर्कनाथचौधरीमहाभागानाम् अध्यक्षतायां सम्पन्नः। तत्र प्रो. पङ्कजचांदेमहोदयाः नाट्यशास्त्रानुसारं नाट्यकलाविकासस्योपरि महनीयं शास्त्रीयव्याख्यानम् अकुर्वन्। प्रो. अभिराजराजेन्द्रमिश्रमहोदयानां गीर्वाणगिरा आधुनिकसाहित्यशास्त्रविषयकं विशिष्टव्याख्यानमाकर्ण्य उपकृताः सर्वे। एवञ्च डो. गौतमपटेलमहाभागानां सारस्वतप्रवचनेनालङ्कृताः वयम्। सत्रद्वये कृतेऽस्मिन् उद्घाटनसमन्विते शास्त्रीयव्याख्यानमालाकार्यक्रमे डो. ललितपटेलः, डो.जानकीशरणः आचार्यः च मञ्चसञ्चालनम् अकुरुताम्।

- १४/८/२०१६ तमे दिनाङ्के गुजरातविश्वविद्यालयस्य संस्कृतविभागनिदेशकचराः प्रो. वसन्तकुमारभट्टमहोदयाः ''पाणिनीयव्याकरणे अर्थः विवक्षा च'' इत्यस्मिन् विषये अश्रुतपूर्वं शास्त्रीयं व्याख्यानम् अकुर्वन्। अस्य सत्रस्य मञ्चसञ्चालनं डो. दीपेश-कतिरामहोदयः अकरोत्। दिवसेऽस्मिन् तिस्रः स्पर्धाः जाताः निबन्धलेखनस्पर्धा, कथाकथनस्पर्धा, समूहगानस्पर्धा च। तासां विवरणम् -

| | |
|---|---|
| कथाकथनस्पर्धा – | १- मयूरः जानी |
| | २-जयेशः शियाणी |
| | ३ - अरुणः पाण्डेयः |
| निबन्धलेखनस्पर्धा – | १- अरुणः पाण्डेयः, आकाशः पुरोहितः च |
| | २ - मयूरः जानी, जयदेवः च |
| | ३ - जयेशःशियाणी, कचोट धरमः च |
| समूहगानस्पर्धा – | १- आकाशः, मयूरः, जयः, राकेशः, हार्दिकः, अजयः |
| | २. अनुपमातिवारीवृन्दः |
| | ३ - राहुलझावृन्दः |





संस्कृतसप्ताहोत्सवस्य उद्घाटनकार्यक्रमे छात्रैः प्रस्तूयमानाः सांस्कृतिक कार्यक्रमः





१५/०८/२०१६ तमे दिनाङ्के ध्वजवन्दनकार्यक्रमः विश्वविद्यालयपरिसरे सम्पन्नः । कुलपतयः प्रो. अर्कनाथचौधरी-महोदयाः वाक्पुष्पैः अन्तेवासिनः अध्यापकान् च आभाषितवन्तः । डॉ. जानकीशरणः आचार्यः डॉ. जयेशमुंगरा च अस्य कार्यक्रमस्य संयोजकत्वम् अकुरुताम् ।

- १६/०८/२०१६ तमे दिनाङ्के महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयस्य कुलपतयः प्रो. रमेशचन्द्रपण्डामहोदयाः समुपस्थाय व्याकरणविषयस्य विशिष्टेन व्याख्यानेनास्मान् अलमकुर्वन् । श्रीउमाशङ्करझा महोदयः अस्य व्याख्यानसत्रस्य मञ्चसञ्चालनम् अकरोत् । दिवसेऽस्मिन् स्फूर्तिस्पर्धा अपि आयोजिताऽऽसीत् । स्पर्धायामस्यां विश्वविद्यालयेऽधीयानाः चतुर्विंशतिः छात्राः भागमवहन् । सर्वेऽपि इमे षट्सु गणेषु विभाजिताः । स्पर्धायां चत्वारि चक्राणि आसन् । प्रत्येकस्मिन् चक्रे वेद-व्याकरण-दर्शन-पुराण-ज्यौतिष-साहित्य-सम्बद्धाः समसामयिकाश्च प्रश्नाः पृष्टाः । स्पर्धायामस्यां विजेतारः इमे छात्राः अभवन्
  - प्रथमस्थाम् - अरुणः पाण्डेयः, अजयः राज्यगुरुः, आशिषः मिश्रः, मणिकान्तः दुबे
  - द्वितीयस्थानम् - जिगरः भट्टः, शिवमः चौबे, सोनपालः ऋषिः, ध्रुविनः जोषी
  - तृतीयस्थानम् - राहुलकुमारः झा, राजकुमारः झा, केशवः पाण्डेयः, परमेशः मिश्रः । डॉ. दीपेशः कतिरा अस्याः स्पर्धायाः संयोजकत्वम् ऊढवान् ।

- १९/०८/२०१६ तमे दिनाङ्के समस्यापूर्तिस्पर्धा वक्तृत्वस्पर्धा च आयोजिते । तयोः विवरणम् -

| | |
|---|---|
| समस्यापूर्तिस्पर्धा - | १ - अरुणः पाण्डेयः, २ - जिगरः भट्टः |
| वक्तृत्वस्पर्धा - | १ - अरुणः पाण्डेयः, १ - जिगरः भट्टः |
| | २ - रोहितः बालासरा, ३ - हर्षः केवलः |

अस्मिन्नेव दिवसे **UGC NET-JRF Gujarat SLET** प्रशिक्षणवर्गस्योद्घाटनसमन्वितः संस्कृतसप्ताहोत्सवसम्पूर्तिकार्यक्रमः पुरस्कारार्पणपूर्वकं समजायत । तत्र प्रो. देवेन्द्रनाथपाण्डेयमहोदयाः, डॉ. नरेन्द्रकुमारपण्डया महोदयाश्च सारस्वतातिथिभाषणेन उपकृतवन्तः । प्रो. अर्कनाथचौधरी-महोदयाः छात्रान् अध्यापकान् च श्लाघनीयवचोविन्यासेन आध्यक्षीयभाषणेन प्रेरितवन्तः उत्साहितवन्तश्च ।

सम्पूर्णस्य संस्कृतसप्ताहोत्सवस्य शास्त्रीयव्याख्यानमालाकार्यक्रमस्य च सफलतापूर्वकम् उचितानुचितविवेकपुरस्सरं मार्गदर्शनमकुर्वन् अनुस्नातकविभागाध्यक्षाः प्रो. विनोदकुमारझामहोदयाः, संस्कृतमहाविद्यालयस्य प्राचार्याः डॉ. नरेन्द्रकुमारपण्डयामहोदयाश्च । अस्याखिलस्य कार्यक्रमस्य संयोजकत्वं निरूढवन्तः डॉ. ललितकुमारपटेलः, डॉ. जानकीशरणः आचार्यः, श्री उमाशङ्करझा च ।





साहित्यसङ्कायस्य विशिष्टव्याख्यानमालाया भाषमाणः प्रो. पङ्कज चौदमहाभागः

## संस्कृतसप्ताहोत्सवः – २०१७

श्रीसोमनाथसंस्कृतविश्वविद्यालयेन माननीयकुलपतिमहोदयस्य निर्देशानुसारम् ऑगस्टमासस्य प्रथमदिनाङ्कात् अष्टमदिनाङ्कं यावत् विश्वविद्यालयपरिसरे संस्कृतसप्तहोत्सवः आयोजितः। अस्मिन् कार्यक्रमे विश्वविद्यालये भाषण–निबन्धलेखन–समूहगान–स्तोत्र–कण्ठपाठ–रङ्गावली–स्फूर्तिस्पर्धा–साहित्यरचनाद्याः बह्व्यः स्पर्धाः आयोजिताः, यत्र विद्यालयस्तर–विश्वविद्यालयस्तरच्छात्रैः भागः गृहीतः। अस्मिन् संस्कृत–सप्ताहोत्सवे विभिन्नविषयेषु नैकेषां विदुषां भाषणानि आपि समजायन्त । यथा

१. प्रो. चन्द्रकान्त शुक्लः
२. डॉ. मीना शुक्लः
३. डॉ. दिनेशचन्द्र नेगांधी

अस्य संस्कृतसप्ताहोत्सवस्य समापनसमारोहः ०८/०८/२०१८ तमे दिनाङ्के अभवत् यत्र संस्कृतसप्ताहोत्सवस्य समग्रं संयोजनं डो.जानकीशरण आचार्यः डॉ. दिपेश कतिरा च अकुरुताम्।













## श्रीसोमनाथसंस्कृतविश्वविद्यालये संस्कृतसप्ताहोत्सवः

श्रीसोमनाथसंस्कृतविश्वविद्यालये प्रतिवर्षमिव अस्मिन्नपि वर्षे २०.०८.२०१८ दिनाङ्कतः २७.०८.२०१८ दिनाङ्कं यावत् संस्कृतसप्ताहोत्सवः समायोजितः। सप्ताहोत्सवेऽस्मिन् बह्व्यः स्पर्धाः कार्यक्रमाश्च समायोजिताः विश्वविद्यालयेन। इमाः स्पर्धाः कार्यक्रमाश्च ज्ञानभाण्डागारस्य संस्कृतभाषायाः प्रसारे प्रचारे च अवश्यमेव उपयोगिनो भविष्यन्ति।



संस्कृतसप्ताहोत्सवस्य सम्पूर्तिसमारोहस्य किञ्चन दृश्यम्

२०.०८.२०१८ दिनाङ्के संस्कृतसप्ताहोत्सवस्य उद्घाटनकार्यक्रमः विश्वविद्यालयस्य सभागारे सम्पन्नः। कार्यक्रमे मुख्यवक्तृरूपेण लालभाईदलपतभाईभारतीयसंस्कृतिविद्यामन्दिरस्य निदेशकः प्रो. जितेन्द्रशाहवर्यः समुपस्थितिं विधाय संस्कृतस्य महत्त्वविषये छात्रान् उद्बोधितवान्। स न्यगादीत् यत् संस्कृतभाषा सदाचारं बोधयन्ती सन्मार्गं प्रदर्शयन्ती सती जीवनलक्ष्यं प्रापयति। एतस्मिन्नवसरे वेरावल-पाटणसंयुक्त-नगरपालिकायाः अध्यक्षा श्रीमती मञ्जुलाबेन वी. सुयाणीमहोदया अपि उपस्थिता आसीत्। संस्कृतसप्ताहोत्सवेऽस्मिन् वेरावलतालुकाक्षेत्रस्थ-विभिन्नेभ्यः विद्यालयेभ्यः महाविद्यालयेभ्यश्च समागताः आहत्य २०० छात्राः विभिन्नासु स्पर्धासु भागमगृह्णन्। विश्वविद्यालयेन अस्मिन् सप्ताहोत्सवे विद्यालय-महाविद्यालयस्तरे रङ्गवल्ली, श्लोकगानम्, वक्तृत्वस्पर्धा, स्फूर्तिस्पर्धा, निबन्धलेखम्, कथाकथनम्, समूहगानम्, समस्यापूर्तिस्पर्धा च समायोजिताः आसन्। यत्र छात्राः विभिन्नविषयेषु निबन्धलेखन-भाषणादिकं व्यधासिषुः।

२७.०८.२०१८ दिनाङ्के संस्कृतसप्ताहोत्सवस्य समापनकार्यक्रमे प्रो. महेन्द्रकुमारदवे, प्रो. देवेन्द्रनाथपाण्डेयः, डॉ. नरेन्द्रकुमार पण्ड्या, श्रीसोमनाथन्यासस्य प्रबन्धकः श्रीविजयसिंहचावडा च समुपस्थिताः आसन्। विशिष्टातिथिरूपेण उद्बोधनं विदधानः श्रीविजयसिंहचावडा अकथयत् यत् संस्कृतभाषा राष्ट्रभावं प्रेरयति। तदनु मञ्चस्थाः महानुभावाः संस्कृतसप्ताहोत्सवे आयोजितासु स्पर्धासु विजेतृभ्यः छात्रेभ्यः पुरस्कारान् व्यतरन्। अस्य कार्यक्रमस्य संयोजनं डॉ. पङ्कजकुमाररावल-शत्रुघ्नपाणिग्राहीमहोदयौ अकुरुताम्। इत्थं गुजरातराज्यस्य एकमेव संस्कृतविश्वविद्यालयेन संस्कृतसप्ताहोत्सवरूपेण संस्कृतभाषाया उत्तरोत्तरं विकासाय प्रचारप्रसाराय छात्राणाम् उत्साहवर्द्धनाय च नैरन्तर्येण संस्कृतसप्ताहोत्सवस्य आयोजनमिदं सुचारुतया क्रियते।



# સોમનાથ સંસ્કૃત યુનિવર્સિટીમાં સંસ્કૃત સપ્તાહ મહોત્સવ યોજાયો

સોમનાથ સંસ્કૃત યુનિવર્સિટીમાં સંસ્કૃત સપ્તાહ મહોત્સવ યોજાયો હતો અને વિવિધ સ્પર્ધાઓ યોજાતાં યુનિ.નાં 110 છાત્રો તેમજ વેરાવળની માધ્યમિક શાળાઓનાં 40 જેટલા છાત્રોએ ભાગ લીધો હતો અને વિજેતાં સ્પર્ધકોને ઈનામો આપી પ્રોત્સાહિત કરવામાં આવ્યા હતાં.



## श्रीसोमनाथसंस्कृतविश्वविद्यालये समायोजितः संस्कृतसप्ताहोत्सवः

'संस्कृतसप्ताहोत्सवः' विश्वविद्यालयद्वारा प्रतिवर्षं निर्वर्त्यमानेषु अत्यन्तं प्रमुखेषु कार्यक्रमेषु अन्यतमः। अस्मिन् वर्षे श्रावणपूर्णिमां लक्ष्यीकृत्य ऑगस्टमासस्य अष्टमात् दिनात् चतुर्दशं दिनं यावत् भव्यः संस्कृतसप्ताहोत्सवः समाचरितः। उत्सवस्य अस्य अङ्गतया विशिष्टव्याख्यानम्, संस्कृत-पाला-प्रस्तुतिः, राज्यस्तरीयसङ्गोष्ठी, विद्यालय-महाविद्यालयस्तरीयाणां विविधस्पर्धानाम् आयोजनं च कृतमासीत्। विश्वविद्यालयस्य प्राध्यापकौ डॉ. जानकीशरण आचार्यः, डॉ. दीपेश विनोद कतिरा च समग्रस्य अपि कार्यक्रमस्य संयोजनं कृतवन्तौ।

अस्य 'संस्कृतसप्ताहोत्सवः-२०१९' कार्यक्रमस्य उद्घाटनकार्यक्रमः ०८-०८-२०१९ तमे दिनाङ्के पूर्वाह्णे एकादशवादने विश्वविद्यालयस्य सभागारे समायोजितः आसीत्। विशिष्टस्यास्य संस्कृतोत्सवस्य उद्घाटनकार्यक्रमोऽपि अतिविशिष्टः आसीत्। कार्यक्रमस्यास्य आध्यक्ष्यम् ऊढवन्तः अस्य श्रीसोमनाथ-संस्कृतविश्वविद्यालयस्य कुलपतयः प्रो. गोपबन्धुमिश्रमहाभागाः। अवसरेऽस्मिन् विशिष्टव्याख्यानाय सुदूरात् देहलीनगरात् समागताः लालबहादुर-शास्त्रिराष्ट्रियसंस्कृतविद्यापीठस्य दर्शनसङ्कायाध्यक्षाः प्रो. हरेराम त्रिपाठिमहाभागाः स्वीयेन व्याख्यानेन समुपस्थितान् सर्वानपि श्रोतॄन् अनुगृहीतवन्तः। प्रो. त्रिपाठिना साम्प्रतिके काले संस्कृताध्ययनेन न केवलं शिक्षकत्वेन आजीविकायाः अवसरः वर्तते परम् विज्ञान-आभियान्त्रिक-परामर्शसेवादिक्षेत्रेषु अपि संस्कृताध्यापकानां कृते अवसराः समुपलभ्यन्ते।




संस्कृतसप्ताहोत्सवस्य उद्घाटनसत्रे मञ्चस्थाः महानुभावाः

अस्मिन् संस्कृतसप्ताहोत्सवे विविधाः स्पर्धाः द्वयोः स्तरयोः समायोजिताः आसन्। तत्र प्रथमः उच्चमाध्यमिकस्तरः। अस्मिन् स्तरे भागं वोढुं नवमकक्षातः द्वादशकक्षां यावत् पठन्तः छात्राः वेरावल-सोमनाथ-नगरस्य विविधाभ्यः प्रतिष्ठितशालाभ्यः समागताः। द्वितीयः स्तरः महाविद्यालयीयच्छात्राणाम् आसीत्। अस्मिन् स्तरे विश्वविद्यालये शास्त्रि-आचार्यकक्षासु पठन्तः छात्राः भागमवहन्। उभयोः अपि स्तरयोः स्तोत्रकण्ठपाठस्पर्धा, वक्तृत्वस्पर्धा, समूहगानस्पर्धा, निबन्धलेखनस्पर्धा, कथाकथनस्पर्धा, रङ्गवल्लीस्पर्धा च समायोजिता। महाविद्यालयीयच्छात्राणां कृते समस्यापूर्तिस्पर्धा, स्फूर्तिस्पर्धाचापि आयोजिता आसीत्। विश्वविद्यालयस्य प्राध्यापकाः एव आसां स्पर्धानां संयोजनं कृतवन्तः। समेऽपि छात्राः सोत्साहम् आसु स्पर्धासु स्वीयं कौशलं प्रादर्शयन्।



'कीचकवधम्' इति शीर्षकयुतायाः विशिष्टायाः उत्कललोककलायाः प्रदर्शनम्

संस्कृतसप्ताहोतसवस्य अङ्गतया ऑगस्टमासस्य त्रयोदशे दिवसे सायङ्काले वेरावलस्थे सरस्वतीविद्यालयस्य सभागारे संस्कृत-पाला-प्रस्तुतिः समायोजिता आसीत्। 'पाला' इत्येषा उत्कलीया प्रसिद्धा लोककला वर्तते। संस्कृतेन प्रस्तुतायाः 'कीचकवधम्' इति शीर्षकयुतायाः विशिष्टायाः पाला-प्रस्तुतेः कृते सुदूरात् उत्कलराज्यात् गदाधरदाशमहाभागः मिथुनादिसमन्वितेन स्वीयेन नटवृन्देन समं समायातः आसीत्। सुललितसंवादैः, सुभाषितैः, सूक्तिभिः, अभियुक्तोक्तिभिः, गानेन, नृत्येन, अभिनयेन च परिपुष्टा पालाप्रस्तुतिः श्रोतृगणं सुष्ठु समरञ्जयत्।

अस्य संस्कृतसप्ताहोत्सवस्य समापनकार्यक्रमः १४-०८-२०१९ तमे दिनाङ्के अपराह्णे त्रिवादने विश्वविद्यालयस्य सभागारे समायोजितः आसीत्। समापनकार्यक्रमे विश्वविद्यालयस्य कुलपतयः प्रो. गोपबन्धुमिश्रमहोदयाः आध्यक्ष्यमवहन्। मुख्यातिथित्वेन समुपस्थिताः आसन् जूनागढस्थस्य भक्तकविनरसिंहमहेताविश्वविद्यालयस्य कुलपतयः प्रो. चेतन त्रिवेदिमहोदयाः। श्रीमतः त्रिवेदीमहोदयस्य विशिष्टभाषणात् परं महानुभावैः समग्रे संस्कृतसप्ताहे प्रवृत्तासु विविधस्पर्धासु विजयिनां छात्राणां पदकैः प्रमाणपत्रैः स्मृतिचिह्नैः च सम्माननं कृतम्। तदनु प्रो. गोपबन्धुमिश्रमहोदयाः आध्यक्षीयभाषणेन सर्वान् अनुगृहीतवन्तः। सर्वान्ते विश्वविद्यालयस्य कुलसचिवः डॉ. दशरथ जादवमहोदयः कृतज्ञताज्ञापनमकरोत्। इत्थं सम्पन्नः संस्कृतसप्ताहोत्सवः।




संस्कृतसप्ताहोत्सवस्य समापनावसरे मञ्चस्थाः महानुभावाः (वामतः) प्रो. अर्चनादुबे, प्रो. चेतनत्रिवेदी, प्रो. गोपबन्धुमिश्रः, डॉ. दशरथजादवः, डॉ. नरेन्द्रकुमारपण्ड्या च

# संस्कृतसप्ताहोत्सवे विविधस्पर्धासु विजेतृणां सूची

## विद्यालयस्तरः (School Level)

### स्त्रोत्रकण्ठपाठ-स्पर्धा

| | | |
|---|---|---|
| 1st | वाला पारुल नारणभाई | एम. जे. स्वामीनारायण शाला, वेरावल |
| 2nd | रतनधायरा धृतिः | के. के. मोरी माध्यमिक शाला, वेरावल |
| 3rd | गढिया नचिकेत रामसिंहभाई | दर्शनविद्यालयः, वेरावल |

### वक्तृत्व स्पर्धा

| | | |
|---|---|---|
| 1st | कुमारी पाल श्रुतिः | आदित्य बिरला हायस्कूल, वेरावल |
| 2nd | शाश्वत वाजा | आदित्य बिरला पब्लिकस्कूल, वेरावल |

### निबन्धलेखन

| | | |
|---|---|---|
| 1st | यादव प्रीतिः फूलचन्द | आदित्य बिरला हाय स्कूल, वेरावल |
| 2nd | सोरठीया नाज अहमदभाई | श्रीमती मणिबेनकोटक हायस्कूल, वेरावल |

### कथाकथन-स्पर्धा

| | | |
|---|---|---|
| 1st | भारती मिताली किशोरभाई | शेठ एम.पी. गर्ल्स हाय स्कूल, वेरावल |
| 2nd | यादव गोपालः श्यामकरण | आदित्य बिरला हाय स्कूल, वेरावल |
| 3rd | परमः सवजियानी | आदित्य बिरला पब्लिक स्कूल, वेरावल |

### रङ्गवल्ली स्पर्धा

| | | |
|---|---|---|
| 1st | परमार रक्षा चन्दूभाई | शेठ एम.पी. गर्ल्स हाय स्कूल, वेरावल |
| 2nd | कानाबार फोरम मनीषभाई | आदित्य बिरला हाय स्कूल, वेरावल |
| 3rd | कशीष प्रसादः | आदित्य बिरला पब्लिक स्कूल, वेरावल |

### समूहगान स्पर्धा

1st आदित्य बिरला पब्लिक स्कूल, वेरावल - (नीलय भट्ट, अंजली गोवरानी, श्वेता उदास, दिव्येश मालामाडी, क्रिस्टो, राजीव, देवर्षि विसावडीया, खुशी जैसवौर)

2nd श्रीमति मणिबेन कोटक हाय स्कूल, वेरावल - (पाठक मैत्रेय मेहलभाई, सिंघवड माधव दिनेशभाई, चावडा अजय डायाभाई, पांजरी पिंटू रसिकभाई, बामणीया जल्पा दिलखुशभाई, सिंघवड मानसी दिनेशभाई, रोय किरण बालेश्वरभाई)






## विश्वविद्यालयस्तरः (College/University Level)

### स्त्रोत्रकण्ठपाठ-स्पर्धा

| | | |
|---|---|---|
| 1st | सत्यव्रत पाण्डेयः | शास्त्री – II |
| 2nd | दवे नीलः | शास्त्री – II |
| 3rd | जोषी किशनः | शास्त्री – II |

### वक्तृत्व-स्पर्धा

| | | |
|---|---|---|
| 1st | देरासरी ऋषभः | आचार्य – I |
| 2nd | ध्रुविन जोषी | आचार्य – I |
| 3rd | दवे निकुंजः | शास्त्री – II |

### स्फूर्ति-स्पर्धा

| | | |
|---|---|---|
| 1st | मणिकान्त दूबे | आचार्य – I |
| 1st | रादडिया रविः | आचार्य – I |
| 2nd | दवे नीलः | शास्त्री – II |
| 2nd | प्रणव कश्यपः | आचार्य – I |
| 3rd | कृष्णकुमार पाण्डेयः | आचार्य – I |
| 3rd | विक्की कुमारः | शास्त्री – II |

### समस्यापूर्ति-स्पर्धा

| | | |
|---|---|---|
| 1st | देरासरी ऋषभः | आचार्य – I |
| 2nd | पण्ड्या रिधमः | आचार्य – I |
| 3rd | जोषी ध्रुविनः | आचार्य – I |

### रङ्गवल्ली-स्पर्धा

| | | |
|---|---|---|
| 1st | शर्मा सीमा | आचार्य – I |
| 2nd | शर्मा कीर्तिः | शास्त्री – III |
| 3rd | सत्यव्रत पाण्डेयः | शास्त्री – II |

### निबन्धलेखन-स्पर्धा

| | | |
|---|---|---|
| 1st | देरासरी ऋषभः | आचार्य – II |
| 2nd | रादडिया रविः | आचार्य – I |
| 3rd | दवे नीलः | शास्त्री – II |

### कथाकथन-स्पर्धा

| | | |
|---|---|---|
| 1st | शर्मा कीर्तिः | शास्त्री – III |
| 2nd | दवे नीलः | शास्त्री – II |
| 3rd | रादडिया रविः | आचार्य – I |

### समूहगान स्पर्धा

1st व्यासगणः - आचार्य – I (जोषी ध्रुविन, पण्ड्या रिधम, रादडिया रवि, त्रिपाठी ऋषि, जोषी नीलेश, ठुमर ध्रुव)

2nd भारद्वाजगणः - शास्त्री – II - (सत्यव्रत पाण्डेय, अशवार विजय, अखिल पाण्डेय, सूर्यप्रकाश द्विवेदी, अंशुमान पाण्डेय)

3rd शुकदेवगणः - शास्त्री – II - (दवे नील, महेता प्रतीक, आस्तिक चिराग, मिश्रा अंकित, पाढिया जयदीप)



5.



## राज्यस्तरीयशास्त्रीयस्पर्धायां विजेतारः विश्वविद्यालयच्छात्राः

राष्ट्रियसंस्कृतसंस्थानेन अधीतविद्यायाः दृढीकरणाय शास्त्रसंरक्षणार्थं च प्रतिवर्षम् अखिलभारतीयशास्त्रीयस्पर्धा भारतस्तरे आयोज्यते। तदङ्गतया गुजरातराज्यस्य राज्यस्तरीयशास्त्रीयस्पर्धा श्रीवरतन्तुसंस्कृतमहाविद्यालये २९ ऑक्टोबर तः ०१ नवम्बर २०१८ पर्यन्तं समायोजिता आसीत् यत्र समग्रगुजरातराज्यस्य विभिन्नमहाविद्यालयेभ्यः ४०० अधिकाः प्रतिभागिनः सम्मिलिताः अभूवन् । अस्यां स्पर्धायां श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य छात्राः न्याय-वेदान्त-पुराण-साहित्यादिविषयेषु भाषणस्पर्धाभिः सह शलाकादीतरस्पर्धासु अपि भागमगृह्णन् । एभिः छात्रैः अस्यां स्पर्धायां सम्यक् प्रदर्शनं विधाय अधोलिखितस्पर्धासु पुरस्काराः प्राप्ताः -

| | | | | | |
|---|---|---|---|---|---|
| १. | प्रणव कश्यपः | - | वेदान्तभाषणम् | - | प्रथमस्थानम् |
| २. | रजनीश पाण्डेयः | - | न्यायभाषणम् | - | प्रथमस्थानम् |
| ३. | जोषी ध्रुविनः | - | स्फूर्तिस्पर्धा | - | द्वितीयस्थानम् |
| | | - | सांख्ययोगभाषणम् | - | तृतीयस्थानम् |
| ४. | केशव पाण्डेयः | - | स्फूर्तिस्पर्धा | - | द्वितीयस्थानम् |
| | कृष्ण पाण्डेयः | - | वेदभाष्यभाषणम् | - | द्वितीयस्थानम् |
| ६. | देरासरी ऋषभः | - | साहित्यशलाका | - | तृतीयस्थानम् |




राज्यस्तरीयशास्त्रीयस्पर्धायाः सम्पूर्तिसमारोहे मान्याः कुलपतयः प्रो. गोपबन्धुमिश्राः

अस्याः स्पर्धायाः समापनसमारोहः ०१.१२.२०१८ तमे दिनाङ्के सम्पन्नः। कार्यक्रमे श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतिः आचार्यः प्रो. गोपबन्धुमिश्रवर्यः इतरे च अतिथयः विजेतृभ्यः छात्रेभ्यः पुरस्कारं व्यतन्वन्। .श्वविद्यालयच्छात्रदलस्य मार्गदर्शकत्वेन श्रीनित्यानन्द ओझा कार्यमकरोत्।



Joshi Praful K. is taking blessing from VC of Kavikulaguru Kalidas Sanskrit University, Ramtek.



Joshi Praful K. is taking his Certificate from VC of Rashtriya Sanskrit Vidyapeetha, Tirupati.



राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः (आं.प्र.)
मानितविश्वविद्यालयः
राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा 'ए' श्रेण्या पुनः प्रत्यायितः
वाग्वर्धिनीपरिषद्
12th All India Sanskrit Students' Talent Festival
From 31.01.2018 to 03.02.2018
द्वादशः अखिलभारतीयसंस्कृतच्छात्रप्रातिभसमारोहः
प्रमाणपत्रम्

सामोदं प्रमाणीक्रियते यत् SHREE SOMNATH SANSKRIT UNIVERSITY, GUJARAT संस्थायाः शास्त्री(B.A.)/आचार्य (M.A.) II वर्षीयच्छात्रः/छात्रा श्री/कु. ARUN KUMAR PANDEY राष्ट्रियसंस्कृतविद्यापीठस्य वाग्वर्धिनीपरिषदा समायोजिते द्वादशे अखिलभारतीयसंस्कृतच्छात्रप्रातिभसमारोहे शैक्षिक/सांस्कृतिकस्पर्धासु SAMASYAPURTI स्पर्धायां भागग्रहणात्। तत्र प्रथम/द्वितीय/तृतीय/सान्त्वना पुरस्कारं लब्ध्वा स्वर्ण/रजत/कांस्यपदकेन सभाजितः/सभाजिता इति।

डा. यशस्वी, अतिरिक्तसमायोजकः | डा. भारतभूषणरथः, समायोजकः | आचार्य वि. मुरलीधर शर्मा, कुलपतिः, 03.02.2018



राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः (आं.प्र.)
मानितविश्वविद्यालयः
राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा 'ए' श्रेण्या पुनः प्रत्यायितः
वाग्वर्धिनीपरिषद्
12th All India Sanskrit Students' Talent Festival
From 31.01.2018 to 03.02.2018
द्वादशः अखिलभारतीयसंस्कृतच्छात्रप्रातिभसमारोहः
प्रमाणपत्रम्

सामोदं प्रमाणीक्रियते यत् Shree Somnath Sanskrit University, Gujarat संस्थायाः शास्त्री(B.A.)/आचार्य (M.A.) II वर्षीयच्छात्रः/छात्रा श्री/कु. Joshi Praful K. राष्ट्रियसंस्कृतविद्यापीठस्य वाग्वर्धिनीपरिषदा समायोजिते द्वादशे अखिलभारतीयसंस्कृतच्छात्रप्रातिभसमारोहे शैक्षिक/सांस्कृतिकस्पर्धासु Mono-acting स्पर्धायां भागग्रहणात्। तत्र प्रथम/द्वितीय/तृतीय/सान्त्वना पुरस्कारं लब्ध्वा स्वर्ण/रजत/कांस्यपदकेन सभाजितः/सभाजिता इति।

डा. यशस्वी, अतिरिक्तसमायोजकः | डा. भारतभूषणरथः, समायोजकः | आचार्य वि. मुरलीधर शर्मा, कुलपतिः, 03.02.2018



राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः (आं.प्र.)
मानितविश्वविद्यालयः
राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा 'ए' श्रेण्या पुनः प्रत्यायितः
वाग्वर्धिनीपरिषद्
12th All India Sanskrit Students' Talent Festival
From 31.01.2018 to 03.02.2018
द्वादशः अखिलभारतीयसंस्कृतच्छात्रप्रातिभसमारोहः
प्रमाणपत्रम्

सामोदं प्रमाणीक्रियते यत् SHREE SOMNATH SANSKRIT UNIVERSITY, GUJARAT संस्थायाः शास्त्री(B.A.)/आचार्य (M.A.) II वर्षीयच्छात्रः/छात्रा श्री/कु. ARUN KUMAR PANDEY राष्ट्रियसंस्कृतविद्यापीठस्य वाग्वर्धिनीपरिषदा समायोजिते द्वादशे अखिलभारतीयसंस्कृतच्छात्रप्रातिभसमारोहे शैक्षिक/सांस्कृतिकस्पर्धासु RASAPRASNA स्पर्धायां भागग्रहणात्। तत्र प्रथम/द्वितीय/तृतीय/सान्त्वना पुरस्कारं लब्ध्वा स्वर्ण/रजत/कांस्यपदकेन सभाजितः/सभाजिता इति।

डा. यशस्वी, अतिरिक्तसमायोजकः | डा. भारतभूषणरथः, समायोजकः | आचार्य वि. मुरलीधर शर्मा, कुलपतिः, 03.02.2018



राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः (आं.प्र.)
मानितविश्वविद्यालयः
राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा 'ए' श्रेण्या पुनः प्रत्यायितः
वाग्वर्धिनीपरिषद्
12th All India Sanskrit Students' Talent Festival
From 31.01.2018 to 03.02.2018
द्वादशः अखिलभारतीयसंस्कृतच्छात्रप्रातिभसमारोहः
प्रमाणपत्रम्

सामोदं प्रमाणीक्रियते यत् SHREE SOMNATH SANSKRIT UNIVERSITY, GUJARAT संस्थायाः शास्त्री(B.A.)/आचार्य (M.A.) II वर्षीयच्छात्रः/छात्रा श्री/कु. PRAKASH RANJAN MISHRA राष्ट्रियसंस्कृतविद्यापीठस्य वाग्वर्धिनीपरिषदा समायोजिते द्वादशे अखिलभारतीयसंस्कृतच्छात्रप्रातिभसमारोहे शैक्षिक/सांस्कृतिकस्पर्धासु RASAPRASNA स्पर्धायां भागग्रहणात्। तत्र प्रथम/द्वितीय/तृतीय/सान्त्वना पुरस्कारं लब्ध्वा स्वर्ण/रजत/कांस्यपदकेन सभाजितः/सभाजिता इति।

डा. यशस्वी, अतिरिक्तसमायोजकः | डा. भारतभूषणरथः, समायोजकः | आचार्य वि. मुरलीधर शर्मा, कुलपतिः, 03.02.2018

6.



## श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य द्वादशो युवमहोत्सवः-२०१८




युवमहोत्सवोद्धाटनकार्यक्रमे मञ्चस्थैः महानुभावैः पुस्तकलोकार्पणम्

श्रीसोमनाथसंस्कृतविश्वविद्यालयेन प्रतिवर्षं विश्वविद्यालय-स्तरीयः युवमहोत्सवः समायोज्यते। ऐषमः द्वादशः युवमहोत्सवः ०६.१०.२०१८ दिनाङ्कात् ०६.१०.२०१८ दिनाङ्कं यावत् विश्वविद्यालयस्य परिसरे भव्यतया समपादि। श्रीसोमनाथ-संस्कृतविश्वविद्यालसंलग्नेभ्यः विविधेभ्यः महाविद्यालयेभ्यः ४०० अधिकाः छात्राः अत्र शैक्षिक-चित्र-सांस्कृतिक-क्रीडास्पर्धादिषु भागम् अग्राहिषुः। षष्ठे दिनाङ्के प्रातः तत्तन्महाविद्यालयवेषभूषणैः अलङ्कृतानां महाविद्यालयीयानां छात्राणां मान्यानां कुलपतीनाम् आचार्याणां गोपबन्धुमिश्र-महाभागानां मार्गनिर्देशने टावरचौकतः विश्वविद्यालयपरिसरं पर्यन्तं सांस्कृतिशोभायात्रा सम्पन्ना। अनया सह ध्वजारोहणकार्यक्रमः सर्वेषाम् अध्यापकानां, संयोजकानां निर्णायकमण्डलिप्रमुखानां कुलपतीनाञ्च उपस्थितौ विश्वविद्यालयपरिसरे समजनि।

तदनु अस्य द्वादशस्य युवमहोत्सवस्य उद्घाटनकार्यक्रमः ०६.१०.२०१८ तमे दिनाङ्के सम्पन्नः। उद्घाटनकार्यक्रमेऽस्मिन् मुख्यातिथित्वेन गुजरातराज्यस्य सुप्रसिद्धः साहित्यकारः प्रि. डॉ. हसित मेहता महोदयः तथा च स्वर्णिम-गुजरात-स्पोर्टस्-विश्वविद्यालस्य कुलपतिः डॉ. जतिन सोनी, अध्यक्षत्वेन श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. गोपबन्धुमिश्रवर्यः, श्रीलखमभाई भैंसला, श्रीरीतेशभाई फोफण्डी च उपस्थिताः अभूवन्। प्रास्ताविकं विदधानः प्रो. महेन्द्रकुमार दवे अभ्यागतानां स्वागतम् अकरोत्। अथ विश्वविद्यालयस्य योगविभागीयच्छात्राभिः मनोहरं योगप्रदर्शनं प्रादर्शि । उद्घाटनकार्यक्रमान्ते युवमहोत्सवस्य मुख्यसंयोजकः डॉ. जयेशमुंगरा धन्यवादज्ञापनं प्राकटयत्।

अस्मिन् द्वादशे युवमहोत्सवे दिनत्रयं बहवः स्पर्धाः समजायन्त। सांस्कृतिकस्पर्धासु एककसंस्कृतगीतम्, एककशास्त्रीयवादनम्, एककशास्त्रीयगानम्, एककशास्त्रीयनृत्यम्, सङ्घनृत्यम्, एकपात्राभिनयश्च अवर्तन्त। एवमेव चित्रस्पर्धासु आशुचित्रणम्, व्यङ्ग्यचित्रणम् आस्ताम् । शैक्षिकस्पर्धासु सुभाषितकण्ठपाठः, वादविवादस्पर्धा, स्फूर्तिस्पर्धा, साहित्यरचनास्पर्धा, आशुभाषणम्, क्रीडास्पर्धासु योगासनम्, मल्लयुद्धम्, धावनम्, कबड्डी, कूर्दनम्, चतुरङ्गम्, हस्तकन्दुकम् इत्यादिस्पर्धाः समभूवन्। एतासु स्पर्धासु छात्रैः मनोहराणि संस्कृतनाटकानि अभ्यनीयन्त। भाषण-वादविवाद-साहित्यरचनादिभिः स्पर्धाभिः छात्राः स्वप्रातिभं प्रादर्शयन्। अष्टमे दिनाङ्के प्रातः युवमहोत्सवसंयोजकस्य डॉ. जानकीशरण-आचार्यस्य स्फूर्तिस्पर्धासञ्चालनेन सार्धहोराद्वयव्यापिनी स्फूर्तिस्पर्धा समभूत् यत्र आन्तं छात्राः अनया रसप्रदस्पर्धया रसान्विताः अभूवन्। अस्मिन् युवमहोत्सवे निर्णायकरूपेण प्रथितविद्वांसः क्रीडापटवश्च निर्णायकरूपेण समागुः।




युवमहोत्सवस्य समापनकार्यक्रमे उपस्थिताः महानुभावाः

अष्टमे दिनाङ्के अपराह्णे समापनसमारोहः पुरस्कारविरण-कार्यक्रमश्च समायोजितः। कार्यक्रमेऽस्मिन् श्रीसोमनाथसंस्कृत-विश्वविद्यालयस्य कुलपतयः प्रो. गोपबन्धुमिश्रवर्याः आध्यक्ष्यं निरवहन्। सोमनाथन्यासस्य सचिवाः श्री पी.के. लहरी महभागाः विशिष्टातिथिरूपेण उपस्थाय सर्वान् अन्वगृह्णन्। कार्यक्रमस्य आरम्भः विश्वविद्यालयच्छात्रैः कृतया वैदिक्या प्रार्थनया दीपप्राकट्येन च समजायत। तदनु द्वादश-युवमहोत्सवस्य संयोजकः डॉ. जानकीशरण आचार्यः अस्य युवमहोत्सवस्य प्रास्ताविकम् उद्देश्यं विवरणञ्च प्रास्तौत्। तदनु मुख्यातिथिरूपेण श्रीमन्तः पी. के. लहरीमहाभागाः अवादिषुः यत् छात्राणां सहजायाः प्रतिभायाः प्रकटीकरणाय एतादृशः युवमहोत्सवः नितराम् उपकारकोऽस्ति। कुलपतिवर्यैः आचार्यैः गोपबन्धुमिश्रमहाभागैः भणितं यत् अयं युवमहोत्सवः स्वजीवने साफल्यं प्राप्तुम् अस्मान् प्रेरयति। कार्यक्रमे मञ्चस्थमहानुभावाः विश्वविद्यालयाधिकारिकर्मचारिणश्च विजेतृभ्यः पुरस्कारवितरणं कृत्वा अन्वह्णन्। अस्मिन् द्वादशे युवमहोत्सवे आयोजितासु स्पर्धासु सर्वाधिकान् १११ अङ्कान् अवाप्य श्रीवरतन्तुसंस्कृतमहाविद्यालयः विजयवैजयन्त्या व्यभूषयत्। श्रीसोमनाथसंस्कृतविश्वविद्यालयपरिसरच्छात्राः ११० अङ्कान् समवाप्य उपविजयवैजयन्त्या सभाजिताः। कार्यक्रमान्ते तत्कालीनाः कार्यकारिकुलसचिवाः प्रो. महेन्द्रकुमारदवेवर्याः सफलतया सम्पादितस्य कार्यक्रमस्यास्य सहकारं प्रदत्तवद्भ्यः आर्थिकरूपेण सहयोगं प्रदातृभ्यश्च धन्यवादान् प्राचीकटन्। अस्य समग्रस्य द्वादशयुवमहोत्सवस्य मुख्यसंयोजकरूपेण डॉ. जयेशमुंगरा, संयोजकरूपेण डॉ. जानकीशरण आचार्यः, श्रीरविन्द्रकालेमहोदयश्च स्वीयम् उत्तरदायित्वं निरवाक्षु। इत्थञ्च यूनां महोत्सवोऽयं युवमहोत्सवः सफलतया समजायत।











# द्वादशे युवमहोत्सवे विजयिनां सूची -

### 100 M

| | | |
|---|---|---|
| 1 | TRIVEDI PARTH DHARMESHBHAI | SSSU- VERAVAL |
| 2 | CHAUDHARI DIVYESHKUMAR M | NSM, VYARA |
| 3 | JOSHI DILIP ANANDBHAI | SAVSM, DHORIVAV |

### 100 F

| | | |
|---|---|---|
| 1 | CHAUDHARI SUNITAKUMARI CHAMPAKBHAI | SSSU- VERAVAL |
| 2 | GAMIT SNEHAKUMARI CHANDUBHAI | NSM, VYARA |

### 200 M

| | | |
|---|---|---|
| 1 | PANDYA AJAY RAMESHBHAI | SVSM, SOLA |
| 2 | MAHETA KULDEEP VIJAYBHAI | SBSM, PORBANDAR |
| 3 | TRIVEDI VRAJESH RAJESHBHAI | V.T. CHOKSI SM, SURAT |

### 200 F

| | | |
|---|---|---|
| 1 | CHAUDHARI SUNITAKUMARI CHAMPAKBHAI | SSSU- VERAVAL |
| 2 | CHAUDHARI VANDANABAHEN NANUBHAI | NSM, VYARA |

### 400 M

| | | |
|---|---|---|
| 1 | GAMIT JIGNESHBHAI GOPALBHAI | SSSU- VERAVAL |
| 2 | VARNAVA SUKHDEV RAMESHBHAI | SNSM, PETLAD |
| 3 | MODH MUKESH BALADEVBHAI | SASM, AMBAJI |

### 400 F

| | | |
|---|---|---|
| 1 | CHAUDHARI SUNITAKUMARI CHAMPAKBHAI | SSSU- VERAVAL |
| 2 | GAMIT PAYALBEN YOGESHBHAI | NSM, VYARA |

### 1500 M

| | | |
|---|---|---|
| 1 | BHATT HARSHDEEP SHANTILAL | SBSM, PORBANDAR |
| 2 | SHUKLA NIRAV LALITBHAI | SVSM, SOLA |
| 3 | PANDYA URVISH MUKESHBHAI | SAVSM, DHORIVAV |

### CHESS M

| | | |
|---|---|---|
| 1 | THAKAR RAJESHKUMAR GOVINDBHAI | SVSM, SOLA |
| 2 | VYAS PARTH NARESHBHAI | V.T. CHOKSI SM, SURAT |
| 3 | RAVAL SACHIN PRADYUMNBHAI | SNSVP, BHARUCH |

### CHESS F

| | | |
|---|---|---|
| 1 | KACHCHHAVA VARSHABA PRATAPBHAI | SSSU- VERAVAL |
| 2 | GAMIT SNEHAKUMARI CHANDUBHAI | NSM, VYARA |

### YOGA M

| | | |
|---|---|---|
| 1 | GAMIT VIRALKUMAR NAVINBHAI | SSSU- VERAVAL |
| 2 | JOSHI MEHUL D | SBSM, NADYAD. |
| 3 | JOSHI ASHISHBHAI JAYANTIBHAI | SBVSSM (B.ED.),SOLA |

### YOGA F

| | | |
|---|---|---|
| 1 | VALA ALPA RAJABHAI | SSSU- VERAVAL |
| 2 | GAMIT RAVINABEN BALUBHAI | NSM, VYARA |

### WRESTLING KG 50

| | | |
|---|---|---|
| 1 | JOSHI MEHUL D | SBSM, NADIYAD |
| 2 | SHUKLA SHRIDHAR HARSHADBHAI | SVSM, SOLA |
| 3 | AUVDICHYA RONAK V | SBYVSM, MUDETI |

### WRESTLING KG 55

| | | |
|---|---|---|
| 1 | JOSHI KISHAN R. | SBYVSM, MUDETI |
| 2 | JOSHI KIRAN KANJIBHAI | SNSVP, BHARUCH |
| 3 | JANI AMIT MAHESHBHAI | SVSM, SOLA |

### WRESTLING KG 60

| | | |
|---|---|---|
| 1 | DUBE SAGAR SUNIL | SVSM, SOLA |
| 2 | JOSHI ASHISHBHAI JAYANTIBHAI | SBVSSM (B.ED.),SOLA |
| 3 | JOSHI GOVIND | SBYVSM, MUDETI |

### WRESTLING KG 66

| | | |
|---|---|---|
| 1 | DAVE JAYDEV VINUBHAI | SVSM, SOLA |
| 2 | JOSHI AJAY JAMNASHANKAR | SBVSSM (B.ED.),SOLA |
| 3 | JANI MILAN N | SBSM, NADIYAD |

### WRESTLING KG 74

| | | |
|---|---|---|
| 1 | TRIVEDI SACHIN SHRIRAMBHAI | SVSM, SOLA |
| 2 | JOSHI AMIT DHEERAJLAL | SNSVP, BHARUCH |
| 3 | PANDYA SAGARKUMAR S | SBSM, NADIYAD |

### DISK THROW M

| | | |
|---|---|---|
| 1 | BHATT VRAJESH JAYDIPBHAI | SVSM, SOLA |
| 2 | JOSHI DILIP ANANDBHAI | SAVSM, DHORIVAV |
| 3 | JOSHI OMKAR VISHNUBHAI | SSRSM, AHMEDABAD |

### DISK THROW F

| | | |
|---|---|---|
| 1 | CHAUDHARI SANDHYAKUMARI KOTLABHAI | SSSU- VERAVAL |
| 2 | GAMIT PRATIKSHABEN INTABHAI | NSM, VYARA |

### SHOTPUT M

| | | |
|---|---|---|
| 1 | BHATT VRAJESH JAYDIPBHAI | SVSM, SOLA |
| 2 | JOSHI NIRAV H | SBSM, NADIYAD |
| 3 | JOSHI JAYDEV DAYASHAKAR | SSRSM, AHMEDABAD |

### SHOTPUT F

| | | |
|---|---|---|
| 1 | RAM DHRUTIBEN JADAVBHAI | SSSU- VERAVAL |
| 2 | GAMIT PAYALBEN YOGESHBHAI | NSM, VYARA |

### HIGH JUMP M

| | | |
|---|---|---|
| 1 | GAMIT VIRALKUMAR NAVINBHAI | SSSU- VERAVAL |
| 2 | PANDYA MITUL BHARATBHAI | SBVSSM (B.ED.),SOLA |
| 3 | PANDYA MEHUL NARESHBHAI | SVSM, SOLA |

### HIGH JUMP F

| | | |
|---|---|---|
| 1 | LAKHANOTRA JYOTSNA BHIMABHAI | SSSU- VERAVAL |
| 2 | CHAUDHARI SNEHABEN CHEMASINGBHAI | NSM, VYARA |

### LONG JUMP M

| | | |
|---|---|---|
| 1 | PANDYA MEHUL NARESHBHAI | SVSM, SOLA |
| 2 | TRIVEDI HARSHAD BIPINBHAI | SAVSM, DHORIVAV |
| 3 | PANDYA RAVI B | DSM, CHARODI |

### LONG JUMP F

| | | |
|---|---|---|
| 1 | LAKHANOTRA JYOTSNA BHIMABHAI | SSSU- VERAVAL |
| 2 | CHAUDHARI SNEHABEN CHEMASINGBHAI | NSM, VYARA |

### BADMINTAN SINGLE M

| | | |
|---|---|---|
| 1 | JOSHI DHRUVIN HASMUKHBHAI | SSSU- VERAVAL |
| 2 | JANI SAGAR M | SBVSSM (B.ED.),SOLA |
| 3 | JOSHI SUNIL DURGA SHANKARJI | SASM, AMBAJI |

### BADMINTAN SINGLE F

| | | |
|---|---|---|
| 1 | BHINDE DEVANSHI SHAILESH | SSSU- VERAVAL |
| 2 | GAMIT ANKITABEN RAJESHBHAI | NSM, VYARA |

### BADMINTAN DOUBLE M

| | | |
|---|---|---|
| 1 | DHATURIYA HITESH MADHUKARBHAI | SSSU- VERAVAL |
| | JOSHI DHRUVIN HASMUKHBHAI | SSSU- VERAVAL |
| 2 | RAVAL BHARGAV J | SBSM, NADIYAD |
| | DAVE ANAND N | SBSM, NADIYAD |
| 3 | PURANI JIGNESH VIPULBHAI | SASM, AMBAJI |
| | JOSHI SUNIL DURGA SHANKARJI | SASM, AMBAJI |

### BADMINTAN DOUBLE F

| | | |
|---|---|---|
| 1 | BHINDE DEVANSHI SHAILESH | SSSU- VERAVAL |
| | GAMIT POOJABEN RINESHBHAI | SSSU- VERAVAL |
| 2 | GAMIT PRATIKSHABEN INTABHAI | NSM, VYARA |
| | GAMIT ANKITABEN RAJESHBHAI | NSM, VYARA |

### KABADDI

| | |
|---|---|
| 1 | DARSHANAM SANSKRIT MAHAVIDHYALAY CHARODI |
| 2 | SSSU- VERAVAL |
| 3 | SHREE AMBIKA SANSKRIT MAHAVIDHYALAYA, AMBAJI |

### AASHU CHITRAM

| | | |
|---|---|---|
| 1 | DHOLA TARUN DINESHBHAI | BAPSSSM, SARANGPUR |
| 2 | GAMIT SHRADDHA KISHORBHAI | SSSU- VERAVAL |
| 3 | JANI MAYUR RAJESHBHAI | SBVSSM (B.ED.),SOLA |

### CARTOON PAINTING

| | | |
|---|---|---|
| 1 | UPADHYAY SURYAKANT RAGHAVENDRA | SNSM, PETLAD |
| 2 | DAVE KRUTARTH RAXESHKUMAR | SNSVP, BHARUCH |
| 3 | GAMIT SHRADDHA KISHORBHAI | SSSU- VERAVAL |






### RANGOLI

| | | |
|---|---|---|
| 1 | MAHETA KIRANKUMAR ASHOKBHAI | SBVSSM (B.ED.),SOLA |
| 2 | PANDYA JAYDEV B | SSSM, ADALAJ |
| 3 | BHINDE DEVANSHI SHAILESH | SSSU- VERAVAL |

### EKAKI SASTRIYA SONG

| | | |
|---|---|---|
| 1 | JOSHI AKASH ATULBHAI | SVSM, SOLA |
| 2 | JOSHI MAYUR KISHORBHAI | SBVSSM (B.ED.),SOLA |
| 3 | PANDYA DHRUMIL N | SBSM, NADIYAD |

### EKAKI SANSKRIT SONG

| | | |
|---|---|---|
| 1 | JOSHI AKASH ATULBHAI | SVSM, SOLA |
| 2 | UPADHYAY NISARG M | SBSM, NADIYAD |
| 3 | JOSHI NIKHIL ASHOKBHAI | SVSM, SOLA |

### SHUBHASHIT KANTH PATH

| | | |
|---|---|---|
| 1 | PANDYA HARDIK B | DSM, CHARODI |
| 2 | VYAS MANAV VIPULBHAI | SNSVP, BHARUCH |
| 3 | JHA MRITYUNJAY UDAYKANT | V.T. CHOKSI SM, SURAT |

### EK PATRA ABHINAY

| | | |
|---|---|---|
| 1 | JOSHI PRAFUL KANTIBHAI | SSSU- VERAVAL |
| 2 | SEVAK DIPAK UMESHBHAI | SVSM, SOLA |
| 3 | PUROHIT AKASH PRAVINBHAI | SBVSSM (B.ED.),SOLA |

### GROUP DANCE

| | |
|---|---|
| 1 | SHREE NARAYAN SASKRIT MAHAVIDHYALAY, PETLAD |
| 2 | SSSU. VERAVAL |
| 3 | NAVJAGRUTI SANSKRIT MAHAVIDHYALAY, VYARA |

### SASTRIYA NRUTYA

| | | |
|---|---|---|
| 1 | JOSHI SANJAY MAHESHBHAI | SBVSSM (B.ED.),SOLA |
| 2 | PANDYA JAY JANAK | SVSM, SOLA |
| 3 | CHAUDHARI SANDHYAKUMARI KOTLABHAI | SSSU- VERAVAL |

### SASTRIYA VADAN

| | | |
|---|---|---|
| 1 | PANDIT PARTH NARESHBHAI | SVSM, SOLA |
| 2 | UPADHYAY NIKHIL BHARATBHAI | SSRSM, AHMEDABAD |
| 3 | BIJALWAN SANDEEP | SMSM, MAGOD |

### QUIZ

| | | |
|---|---|---|
| 1 | THAKAR RAJESHKUMAR GOVINDBHAI | SVSM, SOLA |
| | JOSHI TUSHAR KANAIYALAL | SVSM, SOLA |
| 2 | PANDEY ARUNKUMAR DEVANAND | SSSU- VERAVAL |
| | PANDYA NANDAN ASHVINBHAI | SSSU- VERAVAL |
| 3 | BORISHAGAR RAHUL RAMESHBHAI | SBVSSM (B.ED.),SOLA |
| | VYASH RUSHI NILESHBHAI | SBVSSM (B.ED.),SOLA |

### AASHU BHASHANAM

| | | |
|---|---|---|
| 1 | VALANGAR HARDIKKUMAR BHARATBHAI | SVSM, SOLA |
| 2 | JOSHI HARESH DHANJIBHAI | SBVSSM (B.ED.),SOLA |
| 3 | KHANDEKA DHAVAL A | SNSM, PETLAD |








### VADVIVAD PAKSHA

| | | |
|---|---|---|
| 1 | SADHU CHETANKUMAR JANAKKUMAR | SBVSSM (B.ED.),SOLA |
| 2 | BHATT SAURABHKUMAR J | SVSM, SOLA |
| 3 | TERAIYA SAGAR HASMUKHBHAI | DSM, CHARODI |

### VADVIVAD VIPAKSHA

| | | |
|---|---|---|
| 1 | JANI RAVI DEVSHANKARBHAI | DSM, CHARODI |
| 2 | JOSHI HARESH DHANJIBHAI | SBVSSM (B.ED.),SOLA |
| 3 | PANDEY ARUNKUMAR DEVANAND | SSSU- VERAVAL |

### SAHITYA RACHNA

| | | |
|---|---|---|
| 1 | THAKAR RAJESHKUMAR GOVINDBHAI | SVSM, SOLA |
| 2 | PANDEY ARUNKUMAR DEVANAND | SSSU- VERAVAL |
| 3 | JOSHI TUSHAR KANAIYALAL | SVSM, SOLA |

### VOLLY-BOL

| | |
|---|---|
| 1 | SAVSM, DHORIVAV |
| 2 | SBVSSM (B.ED.),SOLA |
| 3 | SSSU- VERAVAL |








श्रीसोमनाथसंस्कृतयुनिवर्सिटी-अनुस्नातकभवन/

संस्कृत कोलेज, वेरावलम्

द्वितीयान्तरिकपरीक्षा- मार्च- २०१६

कक्षा- आचार्य-द्वितीय-वर्षम् (द्वितीय-समसत्रम्) गुणा- १०

विषय- नव्य-व्याकरणम् ``````````` समय- ३० मीनीट

प्रश्नपत्र नं- ०२ कोड नंबर- ५.४.१०

| प्रश्नः- १ | प्रश्नः- २ | अनुक्रमाङ्कः (संख्यायाम्)- |
|---|---|---|
| पूर्णाङ्काः- ०५ | पूर्णाङ्काः- ०५ | अनुक्रमाङ्कः शब्देषु- …………….. ………………………………………… |
| प्राप्ताङ्काः- ………………… | प्राप्ताङ्काः- ……………… | छात्रस्य नाम- ………………………………………… |
| परीक्षकस्य हस्ताक्षरम् ………………………………… | परीक्षकस्य हस्ताक्षरम् ……………………………… | छात्रस्य हस्ताक्षरम्- ………………………………………… |
| पर्यवेक्षकस्य हस्ताक्षरम् ………………………………… | पर्यवेक्षकस्य हस्ताक्षरम् ……………………………… | निरीक्षकस्य हस्ताक्षरम्- ………………………………………… |

प्रश्नः- १. निम्नलिखितानां प्रश्नानां विकल्पेषु समीचीनम् उत्तरम् अन्विष्य कोष्ठके लेखनीयम्।

१. षड्विधेषु सूत्रेषु "ङ्याप्प्रातिपदिकात्" सूत्रमिदं किं सूत्रम् अस्ति? ०१

क. अधिकारसूत्रम् ख. विधिसूत्रम् ग. नियमसूत्रम् घ. परिभाषासूत्रम्

२. "न धातुलोप आर्धधातुके" सूत्रे आर्धधातुकग्रहणं लोपविशेषणं वर्तते इति पक्षे कस्य प्रयोगस्य सिद्धिर्भवितुं न शक्नोति? ०१

क. उपेद्धः ख. उपेन्द्रः ग. बेभिदिता घ. गङ्गोदकम्

३. "न धातुलोप आर्धधातुके" सूत्रे आर्धधातुकग्रहणं गुणवृद्धिविशेषणं वर्तते इति पक्षे कस्य प्रयोगस्य सिद्धिर्भवितुं न शक्नोति? ०१

क. स्थापयति ख. भावयति ग. क्नोपयति घ. मरीमृजः

४. नामार्थाः कति सन्ति? ०१

क. ३ ख. ४ ग. ५ घ. ६

५. 'लिङ्ग' नमार्थो वर्तते अस्य किम् उदाहरणं किं विद्यते?

क. वाग् ख. उपानद् ग. दिक् घ. पूर्वोक्तं सर्वम्

प्रश्नः- २. निम्नलिखितयोः सूत्रमेकं सोदाहरणं व्याख्येयम्- ०५

१. **"न धातुलोप आर्धधातुके"** सूत्रस्य आवश्यकता विद्यते न वा इति भाष्यानुसारं लेखनीयम्।

अथवा

नामार्थाः कति सन्ति, के च ते इति सोदाहरणं प्रतिपादनीयम्।

7. 1

7.2

શ્રીસોમનાથ સંસ્કૃતવિશ્વ-વિદ્યાલય-વેરાવળ-ગીરસોમનાથ

શ્રીહરિ:

નામ : પાઠક મોહિત એન

વિષય : કિરાતાર્જુનીયમ પ્રથમદ્વિતીયસર્ગૌ

કક્ષા : શાસ્ત્રી-૩ સેમ-6

" સહસા વિદધીત ન ક્રિયા-
મવિવેક: પરમાપદાં પદમ્ ।
વૃણતે હિ વિમૃશ્યકારિણં
ગુણલુબ્ધા: સ્વયમેવ સમ્પદ: ॥

* किरातार्जुनीयम् *

स्वाध्यायकार्यम् - 1

PAGE NO.
DATE

1) भारविकवेः परिचयं लिखत ।

संस्कृते भारती भारवेः कीर्तिः अस्ति । सोऽपि कालिदासवत् महाकाव्यस्य प्रणेतास्ति ।

उक्तं केनचित् :-

* प्रकाशो सर्वतो दिव्यं
विदधाना सतां मुदे ।
प्रबोधनपरा हृद्या
भा रवेरिव भारवेः ॥

रामकृष्णेन प्रतिपादितं वर्तते यत् - भारवी अचलपुरस्य निवासी आसीत् एवं सः कौशिकगोत्रोत्पन्न नारायणस्वामीनः पुत्रः आसीत् । महाकवेः एकं नाम दामोदरासीत् । सः विष्णु-वर्धनस्य सभापण्डितः आसीत् ।

भारवेः कालः :-

-> (634 मिते ख्रीष्टाब्दे उत्कीर्णः) एहोलशिलालेखे कालिदासवत् सोऽपि विश्रुतकवितया स्मृतः ।

-> काशिकावृत्तौ तत्काव्यादुदाहरणमुपलभ्यते ।

-> तद्रचना कालिदासरचनया प्रभाविता, तद् रचनया च माघरचना प्रभाविता इव प्रतिभाति ।

तेन हि "550" तमख्रीस्टसंवत्सरनिकटकालभवः भारविः" इति।

-> भारविना रचितम् इदं महाकाव्यम् : किरातार्जुनीयम्

अस्य महाकाव्यस्य कथावस्तु महाभारतस्य वन पर्वणः अस्ति।

मुख्यपद्यानि एव अत्र भारवेः दुर्लभां कविप्रतिभां व्यञ्जयति।

महाभारते राज्यनिवासिताः पाण्डवाः स्वधर्मात्यं चिन्तयन्तः मिथः कथां प्रकुर्वते। किरातार्जुनीये "18 अष्टादश" सर्गाः प्राप्यन्ते।

अस्मिन् राजनीतेः वर्णनं च वर्तते। राज्ञां किं कर्तव्यम् तथा अस्मिन् किराते राजा कीदृशः भवते राज्ञां कानि कर्तव्यानि एतादृशाः एषां विषयाणां वर्णनं वर्तते।

महाकाव्ये अस्मिन् शिवअर्जुनयोः किरातार्जुनयोः युद्धस्य कथां निरूपिता। अत्र गुप्तचरात् आरभ्य शिवार्जुनयोः युद्ध पर्यन्तं एवञ्च तदनन्तरं शिवः प्रसन्नो भूत्वा अर्जुनाय दिव्यास्त्रं ददाति एतादृशी कथा अस्मिन् महाकाव्ये भारविना उत्तमतया एवञ्च महाकाव्यानि यानि लक्षणानि सन्ति तेषामनुरूपं इयं कथा निरूपिता।

PAGE NO.
DATE

(2) महाकाव्यस्य लक्षणानि विलिख्य किरातार्जुनीये सङ्गमयत।

मया यानि लक्षणानि अधोलिखितानि तानि सर्वाणि लक्षणानि विश्वनाथेन स्वसाहित्यदर्पणस्य षष्ठमपरिच्छेदे प्रतिपादितानि।

* सर्गबन्धो महाकाव्यं तत्रैको नायकः सुरः॥
सद्वंशः क्षत्रियो वापि धीरोदात्तगुणान्वितः।
एकवंशभवा भूपाः कुलजा बहवोऽपि वा॥
शृङ्गारवीरशान्तानामेकोऽङ्गी रस इष्यते।
अङ्गानि सर्वेऽपि रसाः सर्वे नाटकसन्धयः॥
इतिहासोद्भवं वृत्तमन्यद्वा सज्जनाश्रयम्।
चत्वारस्तस्य वर्गाः स्युस्तेष्वेकं च फलं भवेत्॥
आदौ नमस्क्रियाशीर्वा वस्तुनिर्देश एव वा।
क्वचिन्निन्दा खलादीनां सतां च गुणकीर्तनम्॥
एकवृत्तमयैः पद्यैरवसानेऽन्यवृत्तकैः।
नातिस्वल्पा नातिदीर्घाः सर्गा अष्टाधिका इह॥
नानावृत्तमयः क्वापि सर्गः कश्चन दृश्यते।
सर्गान्ते भाविसर्गस्य कथायाः सूचनं भवेत्॥
सन्ध्यासूर्येन्दुरजनीप्रदोषध्वान्तवासराः॥
सम्भोगविप्रलम्भौ च मुनिस्वर्गपुराध्वराः॥
रणप्रयाणोपयममन्त्रपुत्रोदयादयः॥
वर्णनीया यथायोगं साङ्गोपाङ्गा अमी इह।
कवेर्वृत्तस्य वा नाम्ना नायकस्येतरस्य वा॥
नामास्य सर्गोपादेयकथया सर्गनाम तु।

-> एतानि लक्षणानि किरातार्जुनीये प्रतिपाद्यते ।

-> इदं महाकाव्यमपि काव्यलक्षणानुसारं सर्गबन्धं वर्तते ।
-> अत्र अर्जुनः एक मात्र शूरवीरः नायकः वर्तते ।
-> अयं नायकः क्षत्रियवंशस्य वर्तते ।
-> अर्जुनः वीरनायकः वर्तते ।
-> अत्र वीररसः प्रधानो विद्यते ।
-> अत्र नाट्यसन्धयः
" मुखप्रतिमुखगर्भविमर्शनिर्वहणाख्याः
एताः सन्धयः अपि प्राप्यन्ते ।
-> अत्र कथावृत्तं इतिहासोद्भूतं वर्तते ।
-> अत्रापि चत्वारः वर्गाः सन्ति ।
-> आदौ नमस्क्रिया, अत्र वर्णनीयनायकस्य नाम्ना निर्देशः
कृतः - श्रीयः यथा अस्मिन् "श्रियः कुरूणाम् "
-> लक्षणानुसारं सतां गुण कीर्तनं एवं खलानां निन्दा
वर्तते ।
-> अत्र छन्दसः वैविध्यम् दृश्यते ।
-> किराते सर्गसमाप्तौ छन्दसः वैविध्यं दृश्यते ।
-> अत्राऽपि सर्गान्ते अग्रिमसर्गस्य सूचनं क्रियते ।
-> अष्टाधिकाः सर्गाः " अष्टादश " सर्गाः प्राप्यन्ते ।
-> अत्र चतुर्थे सर्गे नाना वृत्तानि उपयुक्तानि कविना ।
-> अत्र सन्ध्यादीनां स्पष्टरूपेण वर्णनं वर्तते ।
-> अत्र अस्य काव्यस्य मा नाम निर्दिष्टम् ।

साहित्यदर्पणानुसारं एतानि लक्षणानि
किरातार्जुनीये घटन्त्येव ।

स्वाध्यायकार्यम् - २

1) प्रथमसर्गात् केषाञ्चन चार श्लोकानां व्याख्यां लिखत।

1) कृतप्रणामस्य महीं महीभुजे
जितां सपत्नेन निवेदयिष्यतः।
न विव्यथे तस्य मनो न हि प्रियं
प्रवक्तुमिच्छन्ति मृषा हितैषिणः॥

अन्वयः -> कृतप्रणामस्य सपत्नेन, जितां महीं महीभुजे निवेदयिष्यतः तस्य मनः न विव्यथे हि हितैषिणः मृषा प्रियं प्रवक्तुं न इच्छन्ति।

व्याख्या :-> कृतप्रणामस्य तत्कालोचितत्वात्कृतनमस्कारस्य सपत्नेन रिपुणा दुर्योधनेन। जितां स्वायत्तीकृतां महीं महीभुजे युधिष्ठिराय क्रियाग्रहणात्सम्प्रदानत्वम्। निवेद-यिष्यतो ज्ञापयिष्यतः तस्य वनेचरस्य मनो न विव्यथे हि-यस्मात्। हितमिच्छन्ति इति हितैषिणः स्वामिहिता-र्थिनः पुरुषा मृषा मिथ्याभूतं प्रियं प्रवक्तुं नेच्छन्ति।

2) क्रियासु युक्तैर्नृप चारचक्षुषो न वञ्चनीयाः प्रभवोऽनुजीविभिः।
अतोऽर्हसि क्षन्तुमसाधु साधु वा हितं मनोहारि च दुर्लभं वचः॥
॥५॥

PAGE NO.
DATE

व्याख्या :-> हे नृप! क्रियासु कार्यवस्तुषु युक्तैर्नियुक्तैरनुजीविभिः भृत्यैः। चरन्तीति चराः। चरेः पचाद्यजन्तात्प्रज्ञादित्वात् अण्प्रत्ययः। प्रभवो निग्रहानुग्रहसमर्थाः स्वामिनो न वञ्चनीया न प्रतारणीयाः। सत्यमेव वक्तव्यम्। असाधु प्रियं वा। मद्युक्तमिति शेषः। क्षन्तुं अदि मर्हसि कान्तः। इति पथ्यं च मनोहारि प्रियं च वचो दुर्लभम्। अतो मद्वचोऽपि हितत्वादप्रियमपि क्षन्तव्यम्।

3) स यौवराज्ये नवयौवनोद्धतं
निधाय दुःशासनमिद्धशासनः।
मखेष्वखिन्नोऽनुमतः पुरोधसा
धिनोति हव्येन हिरण्यरेतसम्॥

व्याख्या :-> इद्धशासनोऽप्रतिहताज्ञः स दुर्योधनो नवयौवनेनोद्धतं प्रगल्भं। दुःखेन शास्यत इति दुःशासनस्तम्। यौवराज्ये युवराजकर्मणि निधाय नियुज्य पुरोधसा पुरोहितेनानुमतो नुज्ञातः तदुल्लङ्घने दोषस्मरणादिति भावः। अन्यथा पुरोधसा' इत्यत्र। अखिन्नोऽनलसो मखेषु क्रतुषु हव्येन हविषा हिरण्यं रेतो यस्य धिनोति प्रीणयति।

4) अनेकराजन्यरथाश्वसंकुलं
तदीयमास्थाननिकेतनाजिरम्।
नयत्ययुग्मच्छदगन्धिरार्द्रतां
भृशं नृपोपायनदन्तिनां मदः॥

व्याख्या ÷ अयुग्मच्छदस्य सप्तपर्णपुष्पस्य गन्ध इव गन्धो यस्मात्सायुग्मच्छदगन्धिः। नृपाणामुपायनान्युपहारभूता ये दन्तिनस्तेषां मदः। राज्ञामपत्यानि पुमांसो राजन्याः क्षत्रियाः राज्ञोपत्ये जातिग्रहणे यत्। रथा अनेकेषां राजन्यानां रथास्तेन संकुलं व्याप्तं तदीयमास्थाननिकेतनाजिरं सभामण्डपाङ्गणं भृशमन्यथैवार्द्रतां पङ्किलत्वं नयति।

5) महीभृतां सच्चरितैश्चरैः क्रियाः
स वेद निःशेषमशेषितक्रियः।
महोदयैस्तस्य हितानुबन्धिभिः
प्रतीयते धातुरिवेहितं फलैः ॥२०॥

व्याख्या ÷ अशेषितक्रियः समापितकृत्यः स दुर्योधनः सच्चरितैः। चरन्तीति चरास्तैश्चरैः प्रणिधिभिः महीभृतां क्रियाः प्रारम्भान्निःशेषं वेद वेत्ति। स्वरहस्यं तु न कश्चिद्वेदेत्याह महोदयैरिति। धातुरिव तस्य दुर्योधनस्येहितमुद्योगो महोदयैर्महावृद्धिभिः। हितमनुबध्नन्त्यनुसन्धन्तीति हितानुबन्धिभिः। फलैः कार्यसिद्धिभिः प्रतीयते ज्ञायते।

अस्मिन् श्लोके वंशस्थवृत्तमस्ति।

" जतौ तु वंशस्थमुदीरितं जरौ "।

6) व्रजन्ति ते मूढधियः पराभवं
भवन्ति मायाविषु ये न मायिनः।
प्रविश्य हि घ्नन्ति शठास्तथाविधा-
नसंवृताङ्गान्निशिता इवेषवः॥

व्याख्या :- मूढधियो निर्विवेकबुद्धयस्ते पराभवं व्रजन्ति ये मायाविषु मायावत्सु विषये। मायिनो मायावन्तः न भवन्ति अत्रार्थान्तरं न्यसति- प्रविश्येति। शठा अपकारिणो धूर्तास्तथाविधान कुटिलान-संवृतानवर्मितशरीरान्निशिता इषव इव प्रविश्य प्रवेशं कृत्वात्मीया भूत्वा घ्नन्ति हि। "आर्जवं कुटिलेषु न नीतिः इति व्याख्या।

(२) द्वितीय सर्गात् केपाञ्चन षट्श्लोकानां व्याख्यां लिखत ।

1) विहितां प्रियया मनः प्रिया-
मथ निश्चित्य गिरं गरीयसीम् ।
उपपत्तिमदूर्जिताश्रयं
नृपमूचे वचनं वृकोदरः ॥

व्याख्या :- अथ वृकोदरो भीमः प्रियया द्रौपद्या प्रियाग्रह-मस्या इतिोपदेशतात्पर्यसूचनार्थम् विहिताम् अभिहिता-मित्यर्थः। विपूर्वस्य दधानेः क्रियासामान्यवाचिनो यो-ग्यविशेषपर्यवसानात् । मनः प्रियाममिमतार्थ-योगान्मनोहराम् । गिरं गरीयसीं सारवत्तरां निश्चित्य नृपं धर्मराजं उपपत्ति अर्धुक्तियुक्तः मूर्जिताश्रयं उदाराथं इति

अस्मिन् पद्ये वियोगिनीवृत्तमस्ति ।

2) अनुपालयतामुदेष्यतीं
प्रभुशक्तिं द्विषतामनीहया ।
अपयान्त्यचिरन्महीभुजां
जननिर्वादभयादिव श्रियः ॥

व्याख्या : उद्देष्यन्तीं क्षिपतां प्रभुशक्तिम् उद्देष्यन्तीं वर्धिष्यमाणाम् । आच्छीनर्धानुम । क्षिपता प्रभुशक्तिं कोशदण्डजं तेजः । अनीर्ष्यानुत्साहेनानुपालयतामुपेक्षमाणानां महीभुजां त्रियः सम्पदो जननिर्वादभयान्निकृष्टपुरुषानुरागान्च लोकापवादभयादिव यान्ति इत्युत्प्रेक्षा ।
अतः पराक्रमितव्यमित्यर्थः ।

3) मतिभेदतमस्तिरोहिते
गहने कृत्यविधौ विवेकिनाम् ।
सुकृतः परिशुद्ध आगमः
कुरुते दीप इवार्थदर्शनम् ॥

व्याख्या : मतिभेदः कार्यविप्रतिपत्तिः । मतिभेदस्तम इवेत्युपमितसमासः दीप इवेत्युपमानुसारात् । तेन तिरोहिते आच्छन्नेत एव परिशुद्धो निश्चितोऽन्यत्र गहने दुरगाहे कृत्य इति सुविहितः प्रवातादिदोषरहितश्च आगमः शास्त्रं " आगमः शास्त्र आयाते " इति विश्वः ।

4) बलवानपि कोपजन्मनस्तमसो नाभिभवं रुणद्धि यः ।
क्षयपक्ष इवैन्दवीः कलाः सकला हन्ति स शक्तिसम्पदः ॥

व्याख्या : बलवान्धुरोऽपि यः कोपाज्जन्म यस्य तस्य तमसो मोहस्य अभिभवमाक्रान्तिं न रुणद्धि न निवारयति । स नृपः क्षयस्य पक्षः कृष्णपक्ष इन्दवीरिन्दुसम्बन्धिनीः कला इव सकला समग्राः शक्तिसम्पदः " प्रभुमन्त्रोत्साहः " हन्ति नाशयति ।

5) सहसा विदधीत न क्रिया-
मविवेकः परमापदां पदम्।
वृणते हि विमृश्यकारिणं
गुणलुब्धाः स्वयमेव सम्पदः ॥30॥

व्याख्या :- 'सहसेत्याकस्मिकाविमर्शयोः' इति। न विदधीत न कुर्वीत। सहसा अविमृश्येत्यर्थः। अविवेकोऽविमृश्य कारित्वं परमत्यन्तमापदां पदं स्थानम्। गुणलुब्धा इति गुणगृध्नवः इति। सम्पदः श्रियः विमृश्य करोतीति विमृश्यकारी तं स्वयमेव वृणते भजन्ते। अत्र सहसा विधाननिषेधकारिकार्येण। अर्थान्तरन्यासः।

6) क्व चिराय परिग्रहः श्रियां
क्व च दुष्टेन्द्रियवाजिवश्यता।
शरदभ्रचलाश्चलेन्द्रियै-
रसुरक्षा हि बहुच्छलाः श्रियः॥

व्याख्या :- श्रियां सम्पदां चिराय बहुकालं परिग्रहः स्वायत्तीकरणं क्व। इन्द्रियाणि वाजिन। दुष्टानां अमार्गधाविनां इन्द्रियवाजिनां वश्यो वशंगतस्तस्य भावस्तत्ता क्व। नोभयमेकत्र तिष्ठति कुतः हि यस्माच्छरदभ्रवच्चलाश्चञ्चलाः किं बहुच्छला बहुव्याजाः श्रियः सम्पदः। कथञ्चित्प्राप्ता अपि श्रियो नाविनीतेषु तिष्ठन्तीत्यर्थः। काव्यलिङ्गं।

स्वाध्यायकार्यम् - ३

PAGE NO.
DATE

1) द्रौपद्याः वक्तव्यं लिखत।

द्रौपद्याः वक्तव्यं प्रथमे सर्गे वर्तते। द्रौपदी साक्षात् युधिष्ठिरं प्रति कथयति-

हे महाराज! भवतः पराक्रमे न तु किन्तु एका नारी भवते अनुशासन विषये कथयति चेत् अपमान सदृशं भवति तथाऽपि मनोव्यथानां कारणेन अहं वदामि।

तादृश को जनः भवान् सदृशः वर्तते यः सर्वाणि सुखसाधनानि त्यक्त्वा भूम्याः अपहरणं कारयति।

यः भीमः रक्तचन्दनस्य लेपं करोति एवं रथे आरूढो भूत्वा चलति सः अधुना धूल्या लेपनं करोति एवं सः पादाभ्यामेव वने विचरति। यः उत्तरकुरुं जीत्वा भवतेधनं दत्तवान् सः अधुना वृक्ष-वस्त्राणि धारयति।

इमौ द्वौ नकुलसहदेवौ व्याप्तकोशेः वनगज-सदृशौ भवतः।

सहस्रान् ब्राह्मणान् भोजयित्वा भोजनं अकरोत् अधुना वनभूमौ सुप्त्वा श्रृगालस्य ध्वनिं शृणुमः।

हे महाराज! तस्मात् कथयामि यत् शान्तिं त्यक्त्वा तेजसः धारणं करोतु।

शान्त्या मुनीनां सिद्धिः भवति न तु राज्ञः। भवता वनवासस्य कालस्य प्रतिज्ञा न कर्तव्या।

इति वक्तव्यमस्ति यत् द्रौपदी युधिष्ठिराय प्रददाति।

PAGE NO.
DATE

2) भीमस्य वक्तव्यं लिखत ।

द्रौपद्याः इमानि वचनानि श्रुत्वा भीमोऽपि युधिष्ठिराय कथयति-
भीमस्य उक्ति द्वितीय सर्गे प्राप्यते ।

हे महाराज द्रौपद्या यत् कथितं तत् बृहस्पति अपि आश्चर्ये नैवागच्छति । सोऽपि प्रभावितो भवति । विशेषः जनाः गुणस्य पक्षपातिनः सन्ति इति ।
आन्वीक्षिकी इत्यादि चतसृणां विद्यानां ज्ञाता वर्तते तथाऽपि भवान् कर्तव्यनिर्धारणं मोहितः जातः । देवेभ्यः अपि भवतां पराक्रमः प्रसिद्धः आसीत् कुत्र गतः सः पराक्रमः ।
शत्रुभिः प्रदत्ता इयं दुर्दशा वर्तते तथाऽपि तां वयं भुञ्जामः । यद्यपि वयं कुशलाः । भवान् अद्य विचारं करोति यत् वनअवधिनन्तरं सः अस्मभ्यं राज्यं दास्यति तत्तु नैव भविष्यति ।
तेन राज्यस्य स्वादः प्राप्तः अतः स राज्यं न दास्यति ।

शत्रुषु कः तादृशो वर्तते यः स भवतां भ्रातृणां सदृशः नास्ति ।
सः स्वयमेव राज्यं दद्याति तथापि अस्मासु या वीरता वर्ततु सा तु व्यर्था भविष्यति इमाः उक्तयः भीमस्य सन्ति ।

स्वाध्यायकार्यम् - 4

1) विंशतिलघुप्रश्नानां निर्माणं कृत्वा तेषामुत्तराणि दत्त ।

1) किरातार्जुनीयस्य कर्ता कः ?
-> किरातार्जुनीयस्य कर्ता भारविः वर्तते ।

2) किरातार्जुनीये नायकप्रतिनायकौ कौ ?
-> किरातार्जुनीये नायकः अर्जुनः एवं प्रतिनायकः किरातवेश-धारि शिवः ।

3) अस्मिन् महाकाव्ये कति सर्गाः सन्ति ?
-> अस्मिन् महाकाव्ये "अष्टादश:" सर्गाः सन्ति ।

4) किराते प्रधान रसः कः ?
-> किराते प्रधान रसः वीरः अस्ति ।

5) किरातार्जुनीयस्य मङ्गलाचरणे प्रथमः शब्दः कः ?
-> किरातार्जुनीयस्य मङ्गलाचरणे प्रथमः शब्दः "श्रियः" वर्तते ।

6) किरातार्जुनीये कयोः युद्धं निरूपितम् ?
-> किरातार्जुनीये शिवार्जुनयोः युद्धं निरूपितम् ।

7) अर्जुनः कीदृशो नायको विद्यते ।
-> अर्जुनः धीरोदात्तः वीर क्षत्रियः वर्तते ।

8) किरातार्जुनीये कस्याः नीतेः वर्णानि वा वर्णनानि प्राप्यन्ते ।
-> किरातार्जुनीये राजनीतेः वर्णनं प्राप्यते ।

PAGE NO.
DATE

9) किरातार्जुनीयस्य प्रथमसर्गे कति श्लोकाः? किञ्च मुख्यं छन्दः?
-> किरातार्जुनीयस्य प्रथमसर्गे "46" श्लोकाः सन्ति एवं मुख्यमत्र वंशस्थवृत्तमस्ति ।

10) किरातार्जुनीयस्य द्वितीयसर्गे कति श्लोकाः? किञ्च तत्र वृत्तम?
-> किरातार्जुनीयस्य द्वितीय सर्गे "59" श्लोकाः एवं वियोगिनी छन्दः ।

11) भारवेः किं प्रसिद्धम ?
-> भारवेः 'अर्थगौरवम' प्रसिद्धम ।

12) प्रथमसर्गे कस्य उक्तयः प्राप्यन्ते ?
-> प्रथमसर्गे वनेचरस्य एवं द्रौपद्याः उक्तयः सन्ति ।

13) द्वितीयसर्गे कयोः द्वयोः उक्तयः प्राप्यन्ते ?
-> द्वितीयसर्गे भीमयुधिष्ठिरयोः उक्तयः प्राप्यन्ते ।

14) गुप्तचरः वा वनेचरः कस्य सन्देशमादाय आगतवान ?
-> गुप्तचरः ब्रह्मचारि दुर्योधनस्य शासनव्यवस्था किदृशी वर्तते तां दृष्ट्वा आगतवान ।

15) भारवेः कः कालः मन्यते ।
-> विदुषां मतानुसारं अस्य समयो मन्यते षष्ठमशताब्द्याः पूर्वभागं ।

16) भारवेः नगरस्य, पितुः, गोत्रस्य नाम लिखत ।
-> सः अचलपुरस्यनिवासी, नारायणस्वामिनः पुत्रः एवं तस्य गोत्रं कौशिकमिति आसीत ।

17) पाण्डवाः कुत्र निवासं अकुर्वन ।
-> पाण्डवाः द्वैतवने निवासं कृतवन्तः ।

18) अस्य महाकाव्यस्य किं फलम् ?
-> अस्य महाकाव्यस्य फलं "दिव्यास्त्रस्य" प्राप्तिः ।

19) अस्मिन् महाकाव्ये का रीतिः ?
-> अत्र भारविना वैदर्भी रीतिः प्रयुक्ता ।

20) को गुणः अत्र महाकाव्ये ?
-> प्रसादगुणः वर्तते महाकाव्येस्मिन् ।

नाम:- राठड़िया रवि कुमार

कक्षा:- आचार्य प्रथम वर्ष

विषय:- व्याकरणम् (प्रौढ़-मनोरमा)

Page No. :
Date :

?- 1 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' मनोरमासारं व्याख्येयम् ।

उत्तरम् → अर्थवदधातुरप्रत्ययः प्रातिपदिकम्

सामान्यार्थः - धातुं प्रत्ययं प्रत्ययान्तं च वर्जयित्वा अर्थवत् शब्दरूपं प्रातिपदिकसंज्ञं स्यात् ।

मनोरमा :- सूत्रे तन्त्रादिना उभयं विवक्षितमिति भावः अर्थात् सूत्रे अप्रत्ययः इति पदस्य द्विरावृत्तिः भवति - अप्रत्ययः, अप्रत्ययः इति । एतयोः आवृत्तेः अप्रत्यये 'प्रत्ययग्रहणे तदन्ता: ग्राह्याः' अनया परिभाषया तदन्तविधिः भूत्वा 'अप्रत्ययान्तः' इति अर्थः भवति ।

अत्र 'संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति' एतेन नियमेन तदन्तविधेः प्रतिषेधस्य कोऽपि आशंकां करोति इति । चेत् न, यतोहि एषा परिभाषा तत्रैव प्रवृत्ता भवति यत्र प्रत्यय विशेषस्य संज्ञा भवति ।

'अर्थवत्' इति शब्दे अर्थ शब्दात् मतुप् कृत्वा अर्थवत् शब्दस्य सिद्धिः भवति । अत्र 'प्रशंसायाम्' मतुप् कृतः वर्तते । अर्थात् लोके प्रसिद्धत्वं हि प्रशंसामूलम् । एवं प्रकारेण प्रशंसायां मतुप् कृत्वा अर्थवत् शब्दस्य सिद्धिः भवति ।

सूत्रे शब्दस्वरूपम् इत्यस्य अध्याहारं कृत्वा 'अर्थवत्' इति तस्य विशेषणं भवति । अतः अर्थवत् इति नपुंसके वर्तते । प्रातिपदिकं तु नपुंसकम् अस्ति एव ।

'अर्थवत' इति सूत्रे 'अर्थवत' शब्दस्य
किं प्रयोजनम् इति चेत -
ध् + अ + न् + अ = धन इत्यादौ शब्दे
प्रत्येकस्यापि वर्णस्य प्रातिपदिक संज्ञा भविष्यति ।
प्रातिपदिक संज्ञात्वात प्रत्येकस्मात वर्णात स्वाद्युत्पत्तिः
भविष्यति, ततः पुनश्च 'हलङ्याब्भ्यो दीर्घात
सुतिस्यपृक्तं हल' इत्यनेन सूत्रेण 'सु' इत्यस्य
हलङ्यादि लोपः अपि भविष्यति । एवञ्च
'सुप्तिङन्तं पदम्' इति सूत्रेण पद संज्ञात्वात्
'नलोपः प्रातिपदिकान्तस्य' इति सूत्रेण नकारस्य लोपः
भविष्यति एवञ्च 'धनम्' इति रूपस्य सिद्धिः
एव न भविष्यति ।
एवं प्रकारेण अन्येषु उदाहरणेषु अपि
यथा वनम् इत्यादौ अपि शब्दसिद्धौ आपत्तिः
न स्यात्, तदर्थम् अस्मिन सूत्रे अर्थवत्
इति ग्रहणं कृतम् ।

अस्मिन सूत्रे 'अधातुः' इति ग्रहणस्य
किं प्रयोजनम् इति चेत तत्र वदन्ति यत्
धातुं विहाय 'अर्थवत' शब्दस्य एव प्रातिपदिक
संज्ञा स्यात् न तु धातोः । यदि सूत्रे धातुः
इति ग्रहणं न स्यात तर्हि -
हन धातो लङ्लकारे अडागमे कृते अ + हन् + ति
इत्यवस्थायां इतश्च इकारलोपः, पुनश्च तकारस्य
संयोगान्तलोपः भूत्वा अहन् इति रूपं सिद्ध्यति
किन्तु यदि सूत्रे अधातुः इति ग्रहणं न स्यात
तर्हि अहन् इत्यस्य प्रातिपदिक संज्ञा भविष्यति एवञ्च
'नलोपः प्रातिपदिकान्तस्य' इति सूत्रेण 'अहन्' इत्यस्य नकारस्य
लोपः प्राप्स्यति । अतः अनिष्टरूपस्य सिद्धिः न स्यात
अतः सूत्रे 'अधातुः' ग्रहणं कृतम् ।

अप्रत्यय: पदेन प्रत्यय: एतस्य प्रत्ययान्त: द्वयो: अपि ग्रहणं 'प्रत्ययग्रहणे तदन्ता ग्राह्या:' अनया परिभाषया भवति ।

सूत्रे अप्रत्यय: इति ग्रहणं किमर्थम् इति चेत् वदन्ति - 'हरिषु' इति सप्तमी बहुवचने यदि प्रातिपदिकसंज्ञा भवति चेत् तेन स्वाद्युत्पत्ति: भवति एवञ्च हरिषु + सु इति स्थिति भवति एवञ्च 'सु' इत्यस्य रुत्व विसर्गे कृते 'हरिषु:' इति अनिष्टरूपस्य सिद्धि: न स्यात् अत: सूत्रे अप्रत्यय: इति ग्रहणं कृतम् ।

'अप्रत्ययान्त:' इति सूत्रे आवृत्ति: किमर्थं कृता इति चेत् तस्य प्रयोजनं कथयति आचार्य: - हरिषु, एवञ्च करोषि एतयो: सुप् - तिपो: 'सुपो धातुप्रातिपदिकयो:' इति सूत्रेण लुक् प्राप्स्यति एवञ्च हरि, करो इति अनिष्टरूपस्य सिद्धि: भवति अत: सा न स्यात् तदर्थ: 'अस्मिन् सूत्रे अप्रत्ययान्त: इत्यस्य द्विरावृत्ति: कृता वर्तते ।

एवं प्रकारेण मनोरमाग्रन्थे ग्रन्थकार: एतस्य 'अर्थवदधातुरप्रत्यय: प्रातिपदिकम्' इति सूत्रस्य महत्वं प्रतिपादयति ।

Page No.:
Date:

प्र-2 'कृत्तद्धितसमासाश्च' इति सूत्रोपरि ग्रन्थानुसारिणी व्याख्या कार्या।

उत्तर → कृत्तद्धितसमासाश्च

सामान्यार्थः- कृत्-तद्धितान्तौ समासश्च प्रातिपदिक-संज्ञाः स्युः।

मनोरमा:- एतत् सूत्रं कृदन्तानां प्रातिपदिकानां एवञ्च समासानां प्रातिपदिकसंज्ञां करोति। एतेन सूत्रेण यस्य प्रातिपदिकसंज्ञा भवति, सः शब्दः व्युत्पन्नः एव भवति, एवं प्रकारेण व्युत्पन्न रामशब्दस्य प्रातिपदिक संज्ञा कृत्तद्धितसमासाश्च इति सूत्रेण एवञ्च अव्युत्पन्न रामशब्दस्य 'अर्थवदधातु-रप्रत्ययः प्रातिपदिकम्' एतेन सूत्रेण भवति।

'राजन् ङस् पुरुष सु' इत्यावस्थायां सुपो-धातुप्रातिपदिकयोः एतेन सूत्रेण सुपां लुक् भवति एवञ्च स्थितिः भवति राजन् + पुरुषः इदानीं नलोपः प्रातिपदिकान्तस्य इत्यनेन सूत्रेण राजन् इत्यस्य नकारलोपः भवति एवञ्च राज-पुरुषः सिद्ध्यति। समासात्पूर्वं एषः शब्दः प्रत्ययान्तः आसीत् किन्तु समासानन्तरं प्रत्ययान्तः नास्ति इदानीं धातुः अपि नास्ति प्रत्ययः अपि नास्ति, प्रत्ययान्तः अपि नास्ति किन्तु अर्थवान् अस्ति अतः राजपुरुष इत्यस्य 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' सूत्रेण प्रातिपदिकसंज्ञा भवितुं शक्नोति, किन्तु अस्यां स्थितौ 'कृत्तद्धितसमासाश्च' सूत्रे 'समासग्रहणं' अनर्थकं भविष्यति इति प्रश्ने सति वदति भट्टोजि दीक्षितः-

Page No.:
Date:

"पूर्वसूत्रेण सिद्धे समासग्रहणं नियमार्थम्"

अर्थात् समासस्य प्रातिपदिकसंज्ञा पूर्वसूत्रेण इत्युक्ते "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" एतेन सिद्धम् अस्ति, किन्तु एतेन 'कृत्तद्धितसमासाश्च' अस्मिन् सूत्रे यत् समासग्रहणं कृतं वर्तते तत् नियमार्थम् अस्ति।

"सिद्धे सति आरभ्यमाणो विधिर्नियमाय भवति" अर्थात् सिद्धे सति तस्य विधेः आरम्भः क्रियते तर्हि सा नियमाय भवति। एवञ्च नियमः अतिव्याप्तिदोषस्य वारणाय भवति।

पूर्वसूत्रेण प्रातिपदिकसंज्ञा सिद्धे सति एतेन पुनः समासग्रहणात् नियमः भवति -

यत्र सङ्घाते पूर्वो भागः पदम्, तस्य चेद्भवति तर्हि समासस्यैव। तेन वाक्यस्य न

इदानीं रामो गृहं गच्छति' इति वाक्यस्य धातुभिन्नः, प्रत्ययभिन्नः, एवञ्च प्रत्ययान्तभिन्नत्वात् 'अर्थवत्' इति सूत्रेण प्रातिपदिकसंज्ञा भवितुं शक्नोति, तदा पदसमुदायरूप वाक्यस्य संज्ञा न स्यात् तदर्थं एतस्य यत्र सङ्घाते... इति नियमस्य आवश्यकता भवति।

पुनः कथयति 'अस्मिन् नियमे "उत्तरभागस्तु प्रत्ययो न" इत्यपि अन्ते साधनीयम्। तेन बहुपटवः इत्यादौ चितः इत्यनेन चित्स्वरः सम्भवति।

एवं प्रकारेण मनोरमायां ग्रन्थकारः अस्य सूत्रस्य उपरि व्याख्यानं करोति।

Page No.:
Date:

- 3 'ङ्याप्प्रातिपदिकात्' सूत्रोपरि ग्रन्थानुसारी व्याख्या कार्या ।

उ. → ङ्याप्प्रातिपदिकात्

सामान्यार्थः - ङ्यावन्तात् आबन्तात् प्रातिपदिकात् च इति आपञ्चमाध्यायपरिसमाप्तेरधिकारः ।

मनोरमा :- अस्मिन् सूत्रे ङी शब्दे ङकार अनुबन्धस्य निर्देशः अस्ति किन्तु अन्येषां अनुबन्धानां निर्देशः नास्ति । अतः ङी शब्देन स्त्रीत्व बोधकानां ङीप्, ङीष्, ङीन् त्रयाणां अपि प्रत्ययानां सामान्यतया ग्रहणं भवति । एवञ्च 'प्रत्ययग्रहणे तदन्ता ग्राह्याः' परिभाषया ङ्यन्त, आबन्त इति ग्रहणं भवति ।

प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्, इत्येव सिद्धे ङ्याब्ग्रहणं ङ्याबन्तात् तद्धितोत्पत्तिः यथा स्यात् ङ्याब्भ्यां प्राङ् मा भूत् इत्येवमर्थम् ।

एकः नियमः वर्तते स्वार्थद्रव्यलिङ्गसङ्ख्याकारकाणां क्रमिकत्वम्' अर्थात् स्वार्थ (धर्म), द्रव्य, लिङ्ग, संख्या, कारक एतेन क्रमेण उत्पत्तिः भवति एवञ्च निमित्तकः कार्येषु पूर्व-पूर्व अन्तरंग भवति परं-परं बहिरङ्ग भवति । 'अन्तरङ्ग कार्यं बहिरङ्गात् बलवत् भवति । आर्य शब्दात् स्त्रीत्वविवक्षायां टाप् प्रत्ययः एवञ्च स्वार्थे कन् प्रत्ययस्य अपेक्षायां बलवत् कन् प्रत्ययः भवति । कन् भूत्वा आर्य+कन् एवञ्च तस्य टाप् भूत्वा आर्यिका इति सम्पन्नम् । अत्र यकारोत्तरवर्ती अकारः आकारस्य स्थाने न जातः । अतः उदीचामातः स्थाने यकपूर्वायाः सूत्रं न लगति ।

Page No. :
Date :

फलतः एव विकल्पेन न भूत्वा अभीष्टस्य आर्यका, आर्यिका रूपयोः सिद्धिः न भवति । परन्तु प्रत्ययस्थात् कात् पूर्वस्यात इदाप्यसुपः सूत्रेण नित्य इकारादेशः भूत्वा 'आर्यिका' एकं एव सिद्ध्यति ।

अतः प्रकृतसूत्रे ङ्याप् ग्रहणेन ज्ञापितं भवति यत् कन् आदि तद्धितप्रत्ययानां उत्पत्तिः स्त्रीप्रत्ययात् पूर्वं न भवति अपितु स्त्रीत्वबोधकात् अनन्तरमेव भवति । अतः पूर्वं कन् अभूत्वा टाप् 'एवञ्च आर्या' इति रूपं अनन्तरं कन् अतः 'आर्या + कन्' इदानीं उदीचामातः स्थाने यकपूर्वायाः इति सूत्रेण विकल्पेन इकारादेशः भूत्वा आर्यका, आर्यिका रूप-द्वयमपि सम्पन्नं भवति ।

एवं प्रकारेण लोहिनिका, लोहितिका इत्यादिषु सिद्धिषु अपि द्रष्टव्यम् ।

Page No.:
Date:

प्र० - 4 लघूत्तरं देयम्

प्रश्न > 1). प्रौढमनोरमायाः लेखकः कः ?
→ भट्टोजी दीक्षितः ।

2). मनोरमायाः 'मङ्गलाचरणं' कीदृशम् ?
→

3). 'अर्थवत्' इत्यत्र कः प्रत्ययः ?
→ मतुप् ।

4). 'अर्थवत्' इत्यत्र मतुप् कस्मिन्नर्थे ?
→ प्रशंसायाम् ।

5). 'अर्थवत्...' इति सूत्रे 'अप्रत्ययान्तः' ग्रहणं कथं भवति ।
→ आवृत्तिद्वारा ।

6). 'कृत्तद्धितसमासाश्च' सूत्रे समासग्रहणं किमर्थम् ?
→ नियमार्थम् ।

7). 'अर्थवत्' सूत्रे 'अधातुः' इत्यस्य प्रत्युदाहरणम् ? वद्रे
→ अहन् ।

8). अर्थवत् सूत्रे 'अप्रत्ययः' इत्यस्य प्रत्युदाहरणम् ?
→ हरिषु, करोषि ।

9). कल्मोदयं -- अपदान्तभाजम् ' अत्र अपदान्तभाजम् इत्यस्य कोऽर्थः ?
→ अचलभाजम् ।

10). 'अतो भिस ऐस' सूत्रे ऐस इत्यस्य स्थाने एस ग्रहणं कथं न ।
→ एदैतोर्द्विमात्रत्वाविशेषेण गौरवाभावादैस ।

Date
Page

Name :- Afsodwriya
Bhevti

Std :- F.Y (B.A)
Sem - 2
Sub :-
Vyakrn

9/10

Date
Page

1. णिच् प्रकरणस्य परिचय अर्थात् समागतानाम वार्तिकेय सूत्रम लिखत ।

1

णिच् प्रकरणस्य परिचयः :-

ण्यन्त प्रक्रियाः प्रश्नोन्त दश गणाः सन्ति पठित धातुः प्रेरणा क्रियाया: अर्थ णिच् प्रत्ययः भवति । यथा हिन्दी लिखति- लिखन्ति, पश्यति - पश्यन्ति आदि क्रियायः भवति थाए प्रकरणस्य संस्कृति धातवः णिच् प्रत्ययः प्रेरणार्थे धातुस्य भवति ।

पठ धातवः अर्थे पठति किन्तु पठ इति णिच प्रत्ययः ह्त्यस्य णिजन्त पठ धातुः ॥ अर्थस्य पठति ।

खादति इति अद धातुः अर्थस्य णिच प्रत्यय भवति णिजन्तस्य धातुः अर्थात् खादन्ति भवति ।

हेतुसंज्ञस्य स्वतन्त्र कर्ता इति कर्तृसंज्ञा भवति । अर्थस्य क्रियाया: स्वतन्त्र रूपस्य विचरित कारण कर्तृ संज्ञा भवति।

| सूत्र | वार्तिक सूत्र |
|---|---|
| 1. तत्प्रयोजक हेतुश्च<br>कर्तुः प्रयोजको हेतुसंज्ञः<br>कर्तृसंज्ञश्च स्यात् | — |
| 2. हेतुमति च<br>प्रयोजकव्यापारे<br>प्रेषणादौ वाच्ये<br>धातोर्णिच्स्यात् । | आख्यानात्कृतस्तदाचष्टे इति<br>णिच्, कृल्लुक, प्रकृतिप्रत्या-<br>पत्तिः प्रकृतिवच्च कारणम् । |
| 3. ओः पुयण्ज्यपरे<br>सनि परे यदङ्ग<br>तदवयवाभ्यासोकारस्येत्वं<br>स्यात्पवर्गयण्जकारेष्ववर्ण-<br>परेषु परतः | — |
| 4. स्रवतिशृणोतिद्रवतिप्रवतिप्लवति-<br>च्यवतीनां वा<br>एषामभ्यासोकारस्य इत्वं<br>वा स्यात्सन्यवर्णपरे<br>धात्वक्षरे परे । | — |
| 5. णौ च संश्चङोः<br>सन्परे चङ्परे च<br>णौ श्वयतेः संप्रसारणं<br>वा स्यात् । | — |
| 6. स्तम्भुसिवुसहां चङि<br>उपसर्गनिमित्त षो | — |

Page No.
Date :

स्तस्य षो न स्याद् ।

| | | |
|---|---|---|
| 7. | स्मेरशाब्दिटोः रमेर्नुम्स्यादचि न तु शब्दिटोः । | — |
| 8. | सभेश्च | — |
| 9. | विभाषा वेष्टिचेष्ट्योः अभ्यासस्यात्वं वा स्याच्चङ्परे णौ । | — |
| 10. | स्वापेश्चङि ण्यन्तस्य स्वपेश्चङि संप्रसारणं स्यात् । | — |
| 11 | शाच्छासाह्वाव्यावेपां युक् पालेर्णौ लुग्वक्तव्यः | |
| 12. | लोपः पिबतेरीच्चाभ्यासस्य पिबतेरुपधाया लोपः स्यादभ्यासस्य ईदन्तादेशश्च चङ्परे णौ । | — |

| | |
|---|---|
| 13. तिष्ठतेरित<br>उपधाया उदादेशः<br>स्याद्धः परे णौ । | — |
| 14. जिघ्रतेर्वा | — |
| 15. वो विधूनने जुक्<br>वातेर्जुकस्याण्णौ<br>कम्पेऽर्थे । | — |
| 16. भीस्मोर्हेतुभये<br>स्नेहविपातने<br>लीयतेर्लीतेश्च<br>क्रमान्नुग्लुकावागमौ वा स्तो<br>णौ स्नेहद्रवे । | — |
| 17. लियः संमानन शालीनीक-<br>रणयोश्च<br>लाङ् लियोर्थन्तयोरात्मनेपदं<br>स्यादकर्तृगेऽपि फले<br>पूजाभिभवयोः प्रलम्भने<br>चार्थे । | — |
| 18. बिभेतेर्हेतुभये<br>बिभेतेरेच आत्वं वा<br>स्यात्प्रयोजकाद्भयं चेत् । | — |

प्रश्ने वीयतेः
२७. अस्यैच आत्वं वा स्याण्णौ प्रजनीऽर्थे ।

२८. दोषो णौ
दुष्यतेरूपधाया ऊत्स्य ण्णौ

२९. वा चित्तविरागे
विरागोऽप्रीतता

३०. उभौ साभ्यासस्य
साभ्यासस्यानितेरूभौ नकारौ णत्वं प्राप्नुतौ निमित्ते सति ।

३१. णौ गमिरबोधने
इणो गमिः स्याण्णौ

19. भीस्म्योर्हेतुभये
उपन्साभ्यामाभ्यामात्मनेपदं
स्यात् लोहोत्प्रयस्मयौ ।

20. नित्यं स्मयतेः
स्मयतेरेचो नित्यमात्वं
स्याण्णौ हेतोः स्मये ।

२१. स्फायो वः
णौ

२२. शदेरगतौ तः
शदेर्णौ तोऽन्तादेशः
स्यान्न तु गतौ ।

२३. रुहः पोऽन्यतरस्याम्

24. क्रीङ्जीनां णौ
एषामेच आत्वं
स्याण्णौ क्रापयति ।

25. णौ च संश्चङोः
सन्परे चङ्परे च णौ
इङो गाङ्वा स्यात् ।

26. सिध्यतेरपारलौकिके
ऐहलौकिकेऽर्थे विद्यमानस्य
सिध्यतेरेच आत्वं स्याण्णौ ।

2 कस्य चिन् एकस्य सिद्धिकार्य ।

भावयाम्बभूव

| | |
|---|---|
| भावि + लिट् | 'परोक्षे लिट्' इत्यनेन लिट् लकारः । |
| भावि + लिट् <br> कृत संज्ञा | 'कृदतिङ्' इति सूत्रेण कृत संज्ञा । |
| भावि + आम् + लिट् | कास्यनेकाच आम् वक्तव्यो लिटि इति वार्तिकेन आम प्रत्ययः । |
| भावि + ~~लिट्~~ <br> प्रातिपदिक संज्ञा | 'प्रत्ययलोपे प्रत्ययलक्षणम्' इति परिभाषा सूत्रस्य सहायता । 'कृत्तद्धितसमासाश्च" इत्यनेन प्रतिपदिक संज्ञा । |
| भावि + आम् + सु | 'स्वौजसमौट....' इत्यनेन एकत्वविवक्षायां 'सु' प्रत्ययः । |
| भावि + आम + सु | आमः सूत्रेण सु प्रत्ययस्य लुक् । |
| भाव् + अय् + आम् | "अचोञ्णिति वान्तो यि प्रत्यये" इत्यनेन अय् आदेशः । |

| | |
|---|---|
| भाव्+अय्+आम्+भू+लिट् | 'कृञ्चानुप्रयुज्यते लिटि' इत्यनेन लिट् परकस्य 'भू' धातोः अनुप्रयोगः। |
| भाव्+अय्+आम्+भू+ल् | अनुबन्धलोपः<br>हलन्त्यम्, उपदेशेऽजनुनासिक इत् |
| भाव्+अय्+आम्+भू+तिप् | 'लिटस्तझयो....' इति सूत्रेण 'तिप्' प्रत्ययः। |
| भाव्+अय्+आम्+भू+णल् | परस्मैपदानां णलतुसुस्थलथुसणल्वमाः इति सूत्रेण णल् प्रत्ययः। |
| भाव्+अय्+आम्+भू+अ | अनुबन्धलोपः |
| भाव्+अय्+आम्+भू+वुक्+अ | भुवो वुग् लुङ्लिटोः इति भू धातोः वुक् आगमे कृते। |
| भाव्+अय्+आम्+भू+व्+अ | अनुबन्धलोपः |
| भाव्+अय्+आम्+भूव्+भूव्+अ<br>अभ्यास संज्ञा | लिटि धातोरनभ्यासस्य इति सूत्रेण भूव इत्यस्य द्वित्वं |
| भाव् अय् आम् भू भूव् अ | पूर्वोऽभ्यासः व् कारस्य लोपः। |
| भाव् अय् आम् अ भूव् अ | ह्रस्वः सूत्रेण अभ्यासस्य ऊकारस्य ह्रस्वो भवतः इति ऊकारस्य उकारे कृते। |

PAGE NO. : 45
DATE : / /

| | |
|---|---|
| भाव् अय् आम् बभूव | अभ्यासे चर्च |
| भावयाम् + बभूव | वर्णसम्मेलनम् |
| भावयां + बभूव | 'मोऽनुस्वारः' इत्यनेन अनुस्वारः |
| भावयाम्बभूव | 'वा पदान्तस्य" इत्यनेन परसवर्णः |

3. तत्प्रयोजक हेतुश्च || 1/4/55 ||

छेद: - तत्प्रयोजक
हेतुश्च

विभक्ति - तत्प्रयोजक - 1/1
हेतु: - 1/1
च - अव्ययपद

समास - तस्य प्रयोजकः = तत्प्रयोजकः षष्ठी तत्पुरुष समास

अनुवृत्ति - कर्तुः प्रयोजको हेतुसंज्ञः कर्तृसंज्ञश्च स्यात् ।

अर्थ: - कर्ता प्रयोजकस्य 'हेतु' एवं 'कर्तृ' संज्ञा भवति ।

# अपीपवत्

| | |
|---|---|
| पूङ् + णिच् | 'हेतुमति च' इति सूत्रेण णिच् प्रत्ययः । |
| पूङ् + णिच् | अनुबन्धलोपः 'हलन्त्यम्' 'उपदेशेऽजनुनासिक इत्' 'चुटू' |
| पू + इ | 'सनाद्यन्ता धातवः' इत्यनेन धातुसंज्ञा । |
| पू + इ + लुङ् | 'लुङ्' इति सूत्रेण लुङ् लकारः |
| पू + इ + लुङ् | अनुबन्धलोपः |
| पू + इ + ल् | 'शेषात् कर्तरि परस्मैपदम्' इत्यनेन परस्मैपदस्य विधानम् |
| पू + इ + तिप् | प्रथम पुरुष एकत्वविवक्षायाँ 'तिप्तस्झि.....' इत्यनेन तिप् प्रत्ययः । |
| पू + इ + ति | अनुबन्धलोपः |
| पू + इ + ति | 'इतश्च' इति सूत्रेण इकारस्य लोपः |
| पू + इ + त् सार्वधातुक संज्ञा | 'तिङ्शित्सार्वधातुकम्' इति सूत्रेण सार्वधातुक संज्ञा । |

| | |
|---|---|
| पू इ च्लि त् | कर्तरि शप् इत्यनेन शपः प्राप्तिः तं बाधकर च्लि लुङि सूत्रेण च्लि प्रत्ययः । |
| पू इ चङ् त् | 'च्लेः सिच्' इत्यनेन च्लेः स्थाने सिचः प्राप्तिः तं बाधित्वा णिश्रिद्रुस्रुभ्यः कर्तरि चङ् इत्यनेन चङ् प्रत्ययः । |
| पू इ चङ् त (च् अ ङ्) | अनुबन्धलोपः |
| पू इ अ त् | आर्धधातुकं शेषः इत्यनेन आर्धधातुक संज्ञा |
| पू इ अ त (अंग संज्ञा) | यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम् इत्यनेन अंग संज्ञा । |
| अट् पू इ अ त् | लुङ्लङ्लृङ्क्ष्वडुदात्तः इत्यनेन अडागमः |
| अ~~ट्~~ पू इ अ त | अनुबन्धलोपः |
| अ पू पू इ अ त | 'चङि' इत्यनेन द्वित्वम् |
| अ पू पू इ अ त (अभ्यास संज्ञा) | 'पूर्वोऽभ्यासः' इत्यनेन अभ्यास संज्ञा । |
| अ पु पू इ अ त | 'ह्रस्वः' इत्यनेन ह्रस्वः |

PAGE NO. :
DATE : / /

| | |
|---|---|
| अ पु पौ इ अ त् | अचो ञ्णिति इत्यनेन वृद्धि भवति । |
| अ पु पौ आव् इ अत् | एचोऽयवायावः इत्यनेन आव् आदेशः । |
| अ पु प आव् इ अत् | णेरनिटि इत्यनेन इ कारस्य लोपः |
| अ पु प आव् अ त् (आव् → उपधा संज्ञा) | अलोऽन्त्यात्पूर्व उपधा इत्यनेन उपधा संज्ञा । |
| अ पु प अव अ त् | णौ चङ्युपधाया ह्रस्वः इत्यनेन ह्रस्वः |
| अ पु प अव अ त् (पु → सन्वद् भाव) | सन्वल्लघुनि चङ्परेऽनग्लोपे इत्यनेन सन्वद्भावः |
| अ पि प अव अ त् | ओः पुयण्ज्यपरे इति सूत्रेण दीर्घः |
| अ पी प अव अ त् | दीर्घो लघोः इत्यनेन दीर्घः |
| अपीपवत् | वर्णसम्मेलनम् |

14.

PAGE NO. :
DATE : / /

4. केचन् दश प्रश्नाः लेखनिया एकेन शब्देन भवेत् ।

1. तत्प्रयोजक हेतुश्च सूत्रस्य अर्थं कः ?
कर्ता प्रेरकः

2. कर्ता प्रयोजकस्य का का संज्ञा भवती ?
हेतुसंज्ञा और कर्तृ संज्ञा

3. धातोः कति पथ प्रकारः ?
[illegible]

4. णिच् प्रत्यय कस्मिन् अर्थे कर्तुम् शक्यनुमः ?
प्रेरक अर्थात् कराना

5. प्रयोजक प्रेरक कर्ता कर्तुः व्यापारे वाच्य भवितुम् धातोः किं प्रत्यय भवितुम् आर्हति ?
णिच् प्रत्यय

6. हेतुमति च सूत्रे कः प्रत्ययः भवति ?
णिच्

7. णिच् प्रत्ययस्य कस्मात् सूत्रात् पूर्वम् आगच्छति ?
तत्प्रयोजक हेतुश्च

PAGE NO.: 15
DATE: / /

8. कर्ता: कानी प्रकाराणि सन्ति ?
1) प्रयोजक कर्ता
2) प्रयोज्य कर्ता

9. णिजन्त धातवे कस्य प्रयोगः भवति ?
आत्मनेपद

10. हेतुमत्या: विभक्ति का ?
सप्तमी

11. हेतुमति च सूत्रे कानि पदानि सन्ति ?
द्वौ
1. हेतुमति
2. च

# * अनिवार्यसंस्कृतम् *

नाम :- देरासरी नकुलभः जे.

कक्षा :- आचार्य - २

विषयः :- अनिवार्य संस्कृतम्

"श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम्.

भास्करस्यत्य नमः

* अनिवार्य संस्कृतम् *

श्रीगुरुभ्यो नमः

प्र=१ भारतीयवैज्ञानिकाः ।

(३) भास्कराचार्यः :-

संसारेऽस्मिन् आचार्यस्यास्य नाम सुप्रसिद्धं वर्तते। वराहमिहिरब्रह्मगुप्तयोः अनन्तरं प्रतिभाशाली सर्वगुणसम्पन्नः ज्योतिर्विदः भास्कराचार्यः नास्त्यन्यः। भास्कराचार्यस्य जन्म विद्याविनयसम्पन्ने ब्राह्मणकुले बभूव। महाराष्ट्रप्रान्तस्य सह्याद्रि समीपे स्थितस्य विज्जडविडग्रामे एतस्य आचार्यस्य जन्म बभूव। भास्कराचार्यः शाण्डिल्यगोत्रस्य ब्राह्मणकुले जनिमलभत। भास्कराचार्यस्य पितुः नाम महेश्वरः आसीत तथा च तस्य गुरुरपि आसीत्। केवलं ३६ वर्षस्य वयसि एव सिद्धान्तशिरोमणि सदृशस्य प्रौढग्रन्थस्य रचना अनेनाचार्येण कृता। तथा च ६९ वर्षस्य वयसि एव "करणकुतूहल" नामक ग्रन्थस्य रचना कृता। एतौ द्वावपि ग्रन्थौ ज्योतिषशास्त्रस्य मानक ग्रन्थौ स्तः। वर्तमाने समये सिद्धान्तशिरोमणिः केवलं गणिताध्याय रूपेण तथा च गोलाध्याय रूपेण प्रसिद्धः अस्ति।

आचार्य भास्करः स्वयञ्च तस्य ग्रन्थः लीलावती इत्येतयोः मध्ये अनेकाः दन्तकथाः प्रचलितास्सन्ति। केचन लीलावती भास्कराचार्यस्य पुत्री अस्ति इति मन्यते तथा च केचन पत्नी अस्तीति मन्यते। परन्तु लीलावती भास्कराचार्यस्य पत्नी अस्ति इति इदमेव मतमुपयुज्यते यतो हि ग्रन्थेऽस्मिन् "बाले बाल-कुरङ्गलोलनयने लीलावति प्रोच्यताम्" इति पङ्क्तिः लिखितास्ति। अतः सा पत्नी आसीत न तु पुत्री इति।

भास्कराचार्यस्य पाटीगणितम्, बीजगणितम्, च अपूर्वं वर्तते। सिद्धान्तशिरोमणौ गणितं, प्रश्नोत्तरविधानम् अतीव गूढं वर्तते अद्य दिनं यावत गणितज्ञानां कृते ग्रन्थोऽयं विस्मयकारकोऽस्ति।

भास्कराचार्येण लिखितं बीजगणिते -
"ब्रह्माह्वय श्रीधरपद्मनाभ बीजानि यस्मादति विस्तृतानि

अर्थात ब्रह्मगुप्त श्रीधर पद्मनाभादीनां ग्रन्थेषु सारं संगृह्य बीजगणितं स्वीयं निर्मितम्। श्रीधरस्य "त्रिशतिका" प्रकाशित अस्ति। एवञ्च पद्मनाभस्य बीजगणितमप्राप्यमस्ति। इत्यमस्माभिः ज्ञायते यत् भास्कराचार्येण पूर्वजानां प्रामाणिकग्रन्थानाम् आधारेण स्वकीयग्रन्थादीनां सिद्धान्त - शिरोमणि प्रभृतीनां रचना कृता वर्तते।

* भास्कराचार्यस्य ग्रन्थाः :-

भास्कराचार्येण पञ्चग्रन्थाः निर्मितास्सन्ति तेषां नामानि अधः लिख्यन्ते।

1. लीलावती।
2. बीजगणितम्।
3. सिद्धान्तशिरोमणिः।
4. करणकुतूहलम्।
5. सर्वतोभद्रम्।

एतेषु सर्वेषु ग्रन्थेषु विभिन्नैः टीकाकारैः टीकाः कृतास्सन्ति।

## *२) महर्षिपतञ्जलिः :–

अनेकेषु प्राचीनग्रन्थेषु पतञ्जलेः गोणिकापुत्रः, नागनाथः, अहिपतिः, फणिभृत्, शेषराजः, शेषाहिः, चूर्णिकारः, पदकारश्चेत्येतानि नामानि उल्लिखितानि सन्तीति मीमांसकः सम्यक् तया ग्रन्थनिर्देशपुरस्सरं निर्दिष्टवान् किन्तु सर्वेषां विदुषां मते गोनर्दीयः गोणिकापुत्रश्चेति नामद्वयं पतञ्जलेरेवेति निश्चप्रचम्।

सूर्यायाञ्जलिदानसमये नद्यां गोणिकायाः अञ्जल्यामागतं सर्परूपं तं दृष्ट्वा सा भयेन पुनरञ्जलिं प्रक्षिप्तवती। स सर्प एव बालकरूपेण सञ्जातः। गोणिकया लालितत्वात् गोणिकापुत्र इत्यभिधया प्रसिद्धः, सर्परूपादेव प्रादुर्भावात् नागनाथः, फणिभृत्, अहिपतिः, इत्यादीनि नामानि सञ्जातानि। "गोनर्दीय" इति नाम्नः अयं गोनर्ददेशीयः सिद्ध्यति। मीमांसकस्तु पतञ्जलिं "अभिजानासि देवदत्त कश्मीरान् गमिष्यामस्तत्र सक्तून् पास्यामः" इति महाभाष्य-प्रयोगात् काश्मीरदेशीयं मन्यते।

पाणिनेरष्टाध्यायी विषये पतञ्जलिः महाभाष्ये विशदं विवरणं कृतवानस्ति। पतञ्जलिः पाणिनीय-व्याकरणस्य आदरणीयो विद्वान् वर्तते। यतो हि व्याकरण-सदृशं कठिनमपि विषयं सरलशैल्या पतञ्जलिना प्रतिपादितम्। पतञ्जलिना महाभाष्ये ~~शब्द~~ शब्दसम्बन्धी-विचारैः सह दार्शनिकविचाराणामपि सारल्येन विवेचनं कृतं विद्यते। अत एव भर्तृहरिराह –

"कृतेऽथ पतञ्जलिना गुरुणा तीर्थदर्शिना।
सर्वेषां न्यायबीजानां महाभाष्ये निबन्धने॥

विभिन्नानां शास्त्रग्रन्थानां व्याख्याग्रन्थाः भवन्ति ते च ग्रन्थाः "भाष्य" इति शब्देनाभिधीयन्ते । किन्तु पतञ्जलेः भाष्यं स्वकीयमनुपमं वैशिष्ट्यं बिभर्ति । अत एव तस्य संज्ञा "महाभाष्यम्" इति अस्ति । उक्तञ्च

"सूत्रार्थो वर्ण्यते यत्र वाक्यैः सूत्रानुसारिभिः ।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः ।"

अतः पाणिनीय सूत्राणां कात्यायनादीनां वार्त्तिकानामुपरि सरलशैल्या विशिष्टं व्याख्यानम् अत्र प्रदत्तमस्ति तत्कारणात् इदं "महाभाष्यम्" कथ्यते ।

पतञ्जलेः शब्दस्य व्युत्पत्तिः "पतत् अञ्जलिः" इति अर्थात् "पतति अञ्जलयोः अग्रस्थानीयः यस्मिन् सः" इति । अतः पतत् इत्यत्र टिभागस्य लोपे पतञ्जलिः शब्दः सिद्ध्यति ।

* पतञ्जलेः महाभाष्यम् :-

वैयाकरणेषु महाभाष्यमेवात्यधिकं प्रामाणिकमस्ति अधुना यावत् न कोऽपि महाभाष्यविषये विरुद्धं अवादि । सर्वैः तस्य प्रशंसामेव कृतवन्तः ।

महाभाष्यस्योपरि विभिन्नैः आचार्यैः विभिन्नाः टीकाः कृताः वर्तन्ते । किन्तु प्राप्तासु सर्वासु टीकासु प्राचीनतमा टीका "महाभाष्यप्रदीपम्" कैयटस्य वर्तते । यतो हि अस्यां टीकायाम् अध्यायाः सम्पूर्णानि सूत्राणि विवेच्यन्ते तत्पूर्वमपि भर्तृहरिविरचिता "भाष्यदीपिका" टीका आसीदेव । पूर्णरूपेण लब्धा नासीत् । किन्तु कैयटेन रचितभाष्ये स्वीयां प्रौढीं व्याख्यां लिलिख्य महाभाष्यग्रन्थीः शिथिलीकृत्य तस्य वैयाकरणमूर्धन्येषु गणना सर्वदैव भवति । जैय्यटः कैय्यटपुत्रः आसीत् ।

# * आयुर्वेदः *

* आयुर्वेदस्योद्भवो विकासश्च।

→ आयुर्वेदः तथाविधं शास्त्रं वर्तते येन मनुष्यः स्वकीयमायुषं लभते। अत एव सुश्रुतः आयुर्वेदस्य व्याख्यां इत्थञ्चकार —

"आयुरस्मिन् विद्यते अनेन वा आयुर्विन्दतीति वा आयुर्वेदः॥"

मानवजीवनं सुखमयं भवेत् मानवजीवने प्राप्तं शरीरं स्वस्थं भवेत् तथा च व्याधिगतशरीरस्य रोगनिवारणाय महर्षिभिः स्वप्रतिभानुगुणं यस्य शास्त्रस्य निर्माणं कृतं तदेव आयुर्वेदशास्त्रमिति कथ्यते। अत एव उक्तं वर्तते चरकसंहितायाम् :-

"हिताहितं सुखं दुःखमायुस्तस्य हिताहितम्।
मानं च तच्च यत्रोक्तमायुर्वेदः स उच्यते॥"

इत्थमायुर्वेदस्य प्रयोजनद्वयं वर्तते। तत्र प्रथमं ① व्याध्युपसृष्टानां व्याधिपरिमोक्षः तथा च द्वितीयं स्वस्थस्य स्वास्थ्यरक्षणम्। आयुर्वेदे नानाविधरोगाणां निवारणार्थं विविधचिकित्सानां वर्णनं प्राप्यते। अतः आयुर्वेदः अथर्ववेदस्य उपवेदः वर्तते।

इदं चायुर्वेदशास्त्रं कुतः आगतम् अस्य शास्त्रस्य विकासः कथं जातः इत्यस्मिन् विषये चरकसंहितायां सुश्रुतसंहितायां च कथामाध्यमेन कथितं वर्तते।

तत्र उक्तं यत् आयुर्वेदशास्त्रस्य प्रथमो वक्ता ब्रह्मा वर्तते। ब्रह्मणः मुखादिदं आयुर्वेदशास्त्रं भगवता प्रजापतिना दक्षेणाधीतम्। दक्षतः अश्विनीकुमाराभ्याम् अधीतम्, अश्विनीकुमाराभ्याम् इन्द्रेणाधीतम्, इन्द्रात् दीर्घायुः प्राप्त्यर्थं भरद्वाजेन इदं शास्त्रम् अधीतम्। महर्षिभरद्वाजेन तत्र आयुर्वेदीयशास्त्रज्ञानम् अधीत्य भारतवर्षे तस्य प्रचारः प्रसारः कृतः।

* आयुर्वेदस्य उद्भवपरम्परा :–

ब्रह्मा
|
दक्षः
|
अश्विनीकुमारौ
|
इन्द्रः
|
भरद्वाजः — धन्वन्तरिः — कश्यपः

भरद्वाजः → आत्रेयः पुनर्वसुः → अग्निवेशः, भेलः, जतूकर्णः, पराशरः, हारीतः, क्षारपाणिः

धन्वन्तरिः → दिवोदासः → सुश्रुतः, औपधेनवः, वैतरणः, औरभ्रः, पौष्कलावतः, भोजः

कश्यपः → तच्छिष्याः

तत्र भरद्वाजः कायचिकित्साप्रवर्तकः तस्य परम्परायां श्रेष्ठः ग्रन्थः "चरकसंहिता" इति। धन्वन्तरिः शल्यचिकित्साप्रवर्तकः तस्य परम्परायां ग्रन्थः "सुश्रुतसंहिता" इति। काश्यपऋषिः बालचिकित्साप्रवर्तकः कौमारभृत्यः तस्य श्लाघनीयो ग्रन्थः "काश्यपसंहिता" इति॥

आयुर्वेदशास्त्रे त्रयो ग्रन्थाः प्रसिद्धाः वर्तन्ते
तत्र चरकसंहिता, सुश्रुतसंहिता एवञ्च रत्नसमुच्चयः इति।"
यथा व्याकरणशास्त्रे मुनित्रयाणां व्यवस्था वर्तते तद्वदेव
आयुर्वेदेऽपि चरकः सुश्रुतः वाग्भट्टश्च मुनित्रयम्
इत्यनेन अभिधीयन्ते। अत एवोच्यते आत्रेयसंहितायाम्

"अत्रिः कृतयुगे वैद्यो द्वापरे सुश्रुतो मतः।
कलौ वाग्भट्टनामा च गरिमात्र प्रदिश्यते॥
(आत्रेयसंहिता).

"निदाने माधवः श्रेष्ठः सूत्रस्थाने तु वाग्भटः।
शारीरे सुश्रुतः प्रोक्तश्चरकस्तु चिकित्सिते॥
(आत्रेयसंहिता)

* आयुर्वेदस्य अङ्गानि :-

आयुर्वेदस्य अष्टौ अङ्गानि सन्ति। तेषां
नामानि यथा -

काय बालग्रहोर्ध्वाङ्ग, शल्यदंष्ट्राजरावृषान्।
अष्टावङ्गानि तस्याहुश्चिकित्सा येषु संश्रिता॥"
(अष्टाङ्ग हृदयम्).

आयुर्वेदस्य एतेषां सर्वेषाम् अङ्गानां
इषत्परिचयः अधो दीयते।

(1) शल्यतन्त्रम् - तस्य ग्रन्थः औपधेनवतन्त्रम्, सौश्रुततन्त्रम्।
(2) शालाक्य तन्त्रम् :- ग्रन्थः विदेहतन्त्रम्, शौनकतन्त्रादयः
(3) कायचिकित्सा : ग्रन्थः अग्निवेशसंहिता भेलसंहिता
(4) भूतविद्या - ग्रन्थः चरकसंहितायां उन्मादचिकित्साध्याय:
(5) कौमारभृत्य - ग्रन्थः काश्यपसंहिता
(6) अगदतन्त्रम् :- आलम्बायन संहितादयः ग्रन्थाः
(7) रसायन तन्त्रम् - तस्य ग्रन्थः पातञ्जलतन्त्रम्, व्याडितन्त्रम्
नागार्जुन तन्त्रम् इत्यादयः
(8) वाजीकरणम् :- वाजी अर्थात् अश्वः।

## ✱ आयुर्वेदीयाः आचार्याः

### (1) आचार्यः चरकः :-

चरकसंहितायाः उपदेशः आत्रेयेण पुनर्वसुना कृतः अस्याः संहितायाः प्रणयनम् अग्निवेशेन कृतं प्रतिसंस्कारः चरकेण कृतः तथा च परिवर्धनं दृढबलेन विहितम्। आत्रेयस्य पुनर्वसोः अपराणि नामानि कृष्णात्रेयः, चन्द्रभागी, चान्द्रभागः इत्यादीनि सन्ति। अग्निवेशः आत्रेयस्य शिष्यः आसीत्। आत्रेयस्य षड् शिष्याः भेलः, जतूकर्णः, पराशरः हारीतः तथा क्षीरपाणिः।

चरकसंहितायाः रचयिता आचार्यः चरकः वर्तते। प्रतिसंस्कारो नाम मूल ग्रन्थे यत् संक्षिप्तं कथितं वर्तते तस्य विस्तारः एवञ्च यद् विस्तृतं कथितं तस्य संक्षेपेण कथनं एवञ्च प्रतिसंस्कार उच्यते।

"

चरकसंहितायाः उपरि ४० टीकाः सन्ति किन्तु सर्वाः न मिलन्ति। तत्र प्रसिद्धा टीका भट्टारा हरिश्चन्द्रस्य जेज्जटस्य इत्यादीनां वर्तते।

चरकसंहितायां ८ स्थानानि १२० अध्यायाः सन्ति। तेषां नामानि यथा,

① सूत्रस्थानम् – अस्मिन् स्थाने ३० अध्यायाः सन्ति।
② निदानस्थानम् – अष्टौ अध्यायाः
③ विमानस्थानम् –
④ शारीरस्थानम् – अष्टौ अध्यायाः
⑤ इन्द्रियस्थानम् – १२ अध्यायाः
⑥ चिकित्सास्थानम् – ३० अध्यायाः
⑦ कल्पस्थानम् – अनिमखण्डः
⑧ सिद्धिस्थानम् – १२ अध्यायाः

''

(2) सुश्रुतः आचार्यः :-

आयुर्वेदस्य इतिहासे चरकानन्तरं सुश्रुतस्य महत्त्वपूर्णं स्थानं वर्तते। अस्य आचार्य सुश्रुतस्य सुश्रुतसंहिता चरकसंहितावद् उपादेया प्राचीना च वर्तते। सुश्रुतसंहितायाः उपदेष्टा काशीपतिः दिवोदासः वर्तते। यः धन्वन्तरेः अवतारः मन्यते। अस्याः संहितायाः श्रोता सुश्रुतः वर्तते।

संहितायामस्यां षड्खण्डाः सन्ति। ते च अधो निर्दिश्यन्ते।

(1) सूत्रस्थानम् :- ४६ अध्याय: शल्यचिकित्साया: वर्णनम्।
(2) निदानस्थानम्: - १६ अध्याया: शल्यसम्बन्धी रोगाणां वर्णनम्
(3) शारीरस्थानम् :- १० अध्याया: शरीरावयवानां वर्णनम्।
(4) चिकित्सा स्थानम् - ४० अध्याया: स्वस्थवृत्तोपयोगस्य विशदं विवरणम्।
(5) कल्पस्थानम् :- ८ अध्याया: अगदतन्त्रस्य वर्णनम्।
(6) उत्तरतन्त्रम् :- ६६ अध्याया: रोग चिकित्साया: वर्णनम्।

पञ्चसु खण्डेषु १२० अध्याया: सन्ति किन्तु अन्तिमे उत्तरतन्त्रे ६६ अध्याया: सन्ति इति कृत्वा सुश्रुतसंहितायामाहत्य "१८६" अध्याया: वर्तन्ते।

सुश्रुतसंहिताया उपरि माधवकरस्य "सुश्रुतश्लोकवार्तिकम्" नाम्ना टीका वर्तते। तथा च डल्हणस्य "निबन्धसङ्ग्रह" नाम्ना टीका प्राप्यते।

आयुर्वेदस्य इतिहासं ज्ञातुं चरकसंहितावत् सुश्रुतसंहिता अपि महत्त्वपूर्णा वर्तते। सुश्रुतसंहिता "शल्यचिकित्सा" या: प्रधानो ग्रन्थ: वर्तते। शल्यचिकित्साया: कर्ता दिवोदासस्य धन्वन्तरि शिष्य: अत: ये शल्यचिकित्सका: भवन्ति ते धान्वन्तरीया: इति नाम्ना अभिधीयन्ते। चरकसंहिता कायचिकित्साया: प्रमुखो ग्रन्थ: वर्तते तद्वदेव सुश्रुतसंहिता शल्यचिकित्साया: प्रमुखो ग्रन्थ: वर्तते। इति

## (३) वाग्भट्टः :-

वाग्भट्टस्य चत्वारो ग्रन्थाः वर्तन्ते। ① अष्टाङ्गसङ्ग्रहः ② मध्यसंहिता ③ अष्टाङ्गहृदयम् ④ रसरत्नसमुच्चयः (रस वाग्भट्टः).

① अष्टाङ्गसङ्ग्रहः : ६ स्थानानि, १५० अध्यायाः।
तथा च द्वादशसहस्रश्लोकाः सन्ति। अतः द्वादशसाहस्री इत्यपि उच्यते।

② अष्टाङ्गहृदयम् :- ६ स्थानानि १२० अध्यायाः
([illegible] श्लोकाः)

③ मध्यसंहिता :- कदाचित् द्वादशसाहस्री इत्यपि कथ्यते।

④ रसरत्नसमुच्चयः :- २ खण्डौ, ३० अध्यायाः।
१ तः ११ अध्यायाः रसशास्त्रविषयकाः
१२ तः ३० अध्यायाः चिकित्साशास्त्रीय